॥ अथ श्रीमद्भागवतटिप्पणी दुर्घटभावदीपिका प्रारभ्यते ॥



श्रीमदानन्दतीर्थभगवत्पादाचार्याः ।

(श्रीमन्मध्वाचार्याः)

॥ हरिः ॐ ॥ श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः॥ नारायणं पूर्णगुणं वेदव्यासं जगद्गुरुं ॥ नमामि श्रीमदाचार्यं जयतीर्थमुनीन्विदौ ॥ १ ॥ यत्कृपालेशमात्रेण प्राप्ता वैकुंठनिर्वृतिः ॥ सत्यनाथगुरून्वंदे पितॄंस्तान्सर्वशो मम ॥२॥ तेषामेव प्रसादेन तत्प्रसादैक लिप्सया ॥ श्रीमद्भागवतस्याहं भावं वक्ष्यामि शक्तितः ॥ ३ ॥ परमकारुणिकः श्रीवेदव्यासः प्राणिनां निःश्रेयसाय श्रीनारायणध्यानरूपमंगलमनुष्ठेयमिति शिष्यशिक्षार्थं नारायणध्यानरूपमंगलमुपनिबध्नाति ॥ जन्मादीति । अत्र यत इत्यादि यच्छब्दश्रवणात् तमित्यध्याहारः । तं नारायणं धीमहि ध्यायेमः । देवतांतरपरित्यागेन नारायणस्यैव ध्यानं कुत इत्यत उक्तं ॥ परमिति । परं गुणैः पूर्णं । पॄ पालनपूरणयोरिति धातुव्याख्यानात् । भगवतः परत्वं कुत इत्यत आह ॥ जन्मादीति ॥ अस्य । श्रीब्रह्मरुद्रादेर्जगतः जन्मादि यतो भवति तमित्यन्वयः । एवमुत्तरत्रापि यच्छब्दस्य तच्छब्देनान्वयः । भगवतो जन्मादिकर्तृत्वं कुतः प्रमाणसिद्धमित्यत आह ॥ अन्वयादिति । अन्वीयते सम्यग्ज्ञायते अनेनेति अन्वयः । यतो वा इमानि भूतानि जायंते इत्यादि श्रुत्यादि समुदायः तस्मात् ॥ इतरतश्च । श्रीब्रह्मरुद्रादीदं जगत् चेतनजन्यं कार्यत्वात् पुत्रादिवदिति युक्तितश्च । ननु परमेश्वरस्य सर्वपदार्थज्ञानं विना सर्वपदार्थसृष्टिः कथं युज्यत इत्यत आह ॥ अर्थेष्विति । यः अर्थेषु सर्वपदार्थेषु अभिज्ञः पलपरिमाणादि सर्वधर्मज्ञानवानित्यर्थः । ननु पराधीनत्वे भगवतः सर्वकर्तृत्वमनुपपन्नं स्यादित्यत उक्तं ॥ स्वराडिति । स्वराट् स्वतंत्रः । ननु परमेश्वरस्य सार्वज्ञ्यं स्वातंत्र्यं च कुत इत्यत आह ॥ तेन इति । यः आदिकवये चतुर्मुखाय ब्रह्म वेदं ब्रह्म तत्प्रतिपाद्यं ब्रह्म च हृदा स्नेहेनैव न तु परप्रेरणया तेने उपदिष्टवानित्यर्थः । परप्रेरणां विना स्नेहेनैव आदिचतुर्मुखोपदेष्टृत्वात् सार्वज्ञ्यं स्वातंत्र्य च सिद्धमिति भावः । ननु भागवताध्ययनादिनैव भागवतार्थश्रीनारायणज्ञानसंभवात् भागवतार्थनारायणज्ञानार्थं श्रीनारायणध्यानरूपमंगलं न कार्यमित्यत आह ॥ मुह्यंतीति । यं नारायणं प्रति सूरयो ब्रह्मादयोऽपि मुह्यंति नारायणप्रसादं विना नारायणज्ञानं नाप्नुवंति किम्वन्य इति भावः । प्रयोजनं विना प्रवृत्तेरयोगात् । ईश्वरप्रवृत्तिरपि प्रयोजनसापेक्षेति भ्रमं वारयति ॥ यत्रेति । त्रिसर्गः जीवेश्वरजडानां सर्गः यत्रैव भगवद्विषय एव मृषा वृथैवेत्यर्थः । ईश्वरस्य सृष्ट्यादौ प्रवृत्तिः परप्रयोजनार्थमेव न स्वप्रयोजनार्थमिति भावः । यत्र त्रिसर्गो मृषेयेतत् अमृषेति पदच्छेदेन यत्र येन परमेश्वरेण कृतः त्रिसर्गः जीवेश्वरजडसर्गः अमृषा मिथ्या न भवतीति वा व्याख्येया । तेनेश्वरकृतासृष्टिर्मायामयीति भ्रमानवकाशः । जीवेश्वरजडानां सर्ग एकप्रकार एव भवतीति भ्रमं वारयति ॥ तेज इति । विनिमय शब्दः कार्यवाची । एकवचनं च जातौ । यथा तेजसो दीपरूपस्यैकतेजसः विनिमयः बहूनि दीपरूपाणि कार्याणि तथेश्वरसर्गः । यथा वारिणो विनिमयः वारिनिमित्तकप्रतिबिंबरूपकार्याणि

दु० १

तथा जीवसर्गः । यथा मृदो विनिमयः मृदुपादानकघटादिकार्याणि तथा जडसर्ग इत्यर्थः । त्रिसर्गो मिथ्या न भवतीत्यत्र हेतुमाह ॥ धाम्नेति ॥ स्वेन धाम्ना । स्वकीयशक्त्या ॥ सदानिरस्तकुहकं । नित्यनिरस्तेंद्रजालमित्यर्थः । सत्यसृष्टावशक्ता हि मिथ्यासृष्टिं वितन्वते । परमसमर्थ ईश्वरः मिथ्यासृष्टिं कुतः कुर्यादिति भावः । नारायणधाम्ना निरस्तकुहकत्वं तथा नारायणस्यापि स्वेनधाम्ना निरस्तकुहकत्वं कालविशेष इति भ्रमं वारयितुमुक्तं ॥ सदेति । नन्वीश्वरस्य प्रयोजनाभावे सृष्टौ प्रवृत्तिरेव न स्यात् । कारणाभावात् । इत्याशंक्य यत्रैवेत्यनेन परप्रयोजनरूपमेकं कारणमुक्तं । कारणांतरमाह ॥ सत्यमिति । सच्छब्दः दुःखसंभिन्नत्वरूपदोषाभाववाची । तकारो मुख्यामुख्ययोः संप्रत्यय इति न्यायेन निरतिशयानंदवाची । य शब्दः यातेर्गत्यर्थत्वेन ज्ञानार्थत्वात् अनुभववाची । ततश्च निर्दुःखनिरतिशयानंदानुभवरूपमित्यर्थः । ईश्वरस्य सृष्टौ प्रवृत्तिरानंदोद्रेका इति भावः ॥ १ ॥ भागवतस्यानारंभणीयत्वशंकां परिहर्तुमधिकारिविषयप्रयोजनान्याह ॥ धर्मेति ॥ अत्रैवं योजना ॥ महामुनिकृते । वेदव्यासकृते ॥ अत्र । बुद्धिसंनिहिते । ॥ श्रीमद्भागवते । भगवद्विषयज्ञानजनकत्वेन भगवज्ज्ञानाख्यश्रीयुक्ते भागवते ॥ निर्मत्सराणां । उत्तमेषु मत्सररहितानां ॥ सतां । तितिक्षाकारुणिकत्वसर्वदेहिसुहृत्वाजातशत्रुत्वशांतत्वसाधुत्वभूषणत्वावच्छिन्नभावत्वरूपसत्त्वविशिष्टानां ॥ प्रोज्झितकैतवः ॥ परमः । ईश्वरार्पणेन परमः धर्मः ॥ वेद्यं । वेद्यः अवांतरप्रतिपाद्यः ॥ अत्र । श्रीमद्भागवते ॥ तापत्रयोन्मूलनं । आध्यात्मिकाधिदैविकाधिभौतिकाख्यतापत्रयोन्मूलनं ॥ शिवदं । सकलमंगलदं ॥ वास्तवं । नित्यनिरस्तदोषपूर्णगुणं । अत्र वा शब्दो वातेर्गत्यर्थस्य कर्मणि क्विपि रूपं । अतो गतत्ववाची । संकोचे कारणाभावात् । नित्यापगतत्ववाची सन् नित्यनिरस्तत्वं बोधयति । असिति शब्दः असु क्षेपण इत्यस्य कर्मणि क्विपि रूपं । अतो निरसनीयत्वेन दोषवाची । ततश्च वा शब्दस्यासु शब्देन बहुव्रीहौ वासु शब्देन नित्यनिरस्तदोषमित्यर्थो लभ्यते । त शब्दः तनु विस्तार इत्यस्य भावे ड प्रत्यये रूपं । अतो विस्तारवाची । योग्यतया गुणानां संबंधे गुणविस्तारं बोधयति । व शब्दः अंतर्णीतण्यर्थस्य वृतु वर्तन इत्यस्य कर्तरि ड प्रत्यये रूपं । ततश्च तवमित्यस्य गुणविस्तारमात्मनि निवर्तयतीत्यर्थो बोध्यः । एवं सति वासु शब्दस्य तव शब्देन कर्मधारये वास्तवमित्यनेन नित्यनिरस्तदोषपूर्णगुणमित्यर्थो लभ्यते ॥ वस्तु । अप्रतिहतं नित्यं । अत्र विति शब्दो वातेर्गत्यर्थस्य कर्मणि क्वि प्रत्यये रूपं । अतो अपगतत्ववाची । अ शब्दः अजहरण इति धातोः भावे ड प्रत्यये रूपं । अतः अ शब्देन हरणं प्रहरणं प्रतिहतिरित्यर्थो लभ्यते । एवं सति विति शब्दस्य अ शब्देन बहुव्रीहिसमासे व शब्देनाप्रतिहतमित्यर्थो लभ्यते । तु शब्दः सत्तार्थस्यास्ते कर्तरि तुन्प्रत्यये अकार लोपे रूपं । सत्ता च संकोचे कारणाभावात्सार्वकालिकी विवक्षिता । अतस्तु शब्देन नित्य- ॥ १ ॥

मित्यर्थो लभ्यते । ब्रह्मेति शेषः ॥ परं ब्रह्मवेद्यं । मुख्यवेद्यं । ननु भगवद्भक्त्यर्थं यथा भगवन्माहात्म्यप्रतिपादनं निवृत्तधर्मप्रतिपादनं च पृथक् कर्तव्यं तथा प्रवृत्तधर्मार्थकाममोक्षप्रतिपादनमपि पृथक् कर्तव्यं । तत्कुतो न कृतमित्यत आह ॥ किंवाऽपरैरिति । यतः कारणात् ॥ शुश्रूषुभिः । हरिगुरुसेवापरायणैः ॥ कृतिभिः । निशितबुद्धिभिः ॥ अत्र । अस्मिन्भगवन्माहात्म्यनिवृत्तधर्मप्रतिपादके भागवतेऽभ्यस्यमाने सति ॥ ईश्वरः । नारायणः ॥ हृदि । संपूर्णाधिकारिणां हृदये ॥ सद्यः । तत्क्षणात् ॥ अवरुध्यते । भक्तिपाशेन बध्यते । असंपूर्णाधिकारिणां हृदये तु सद्यः अल्पकालव्यवधानेनावरुध्यते । अतःकारणात्परैः प्रवृत्तधर्मार्थकाममोक्षैः पृथक् प्रतिपादिते । किं वा । किं प्रयोजनं । न किमपीति ॥ २ ॥ हे सौम्य सूत ॥ अन्ये । व्यासादन्ये ॥ परावरविदः । परावरतत्त्वज्ञानिनः मुनयः । यानि विदुः तानि च । च शब्दोऽनुक्तसमुच्चयार्थः । मुनिज्ञातान्यज्ञातानि च सर्वाणि ॥ विदां । ज्ञानिनां श्रेष्ठो भगवान् बादरायणो वेद । यानि भगवज्ज्ञातानि तानि ऋषिभिर्न ज्ञायंत इति यावत् ॥ तदनुग्रहात् । तस्य सर्वज्ञस्य वेदव्यासस्यानुग्रहात् ॥ तत्त्वतस्तत्सर्वं । ऋषिभिर्ज्ञातमज्ञातं चेत्येतत्सर्वं । यथायोग्यं त्वं वेत्थेति ॥ ७–८ ॥ इति श्रीभागवतटिप्पण्यां प्रथमाध्यायः ॥ १–१ ॥

॥ हरिः ॐ ॥ ॥ द्वैपायनो । वेद व्यासः । विरहकातर इव ॥ प्रव्रजंतं । सन्यासाश्रमं गृहीत्वा गच्छंतं ॥ अनुपेतं ॥ देहाद्यभिमानशून्यत्वरूपदेहादिराहित्यविशिष्टं ॥ अपेतकृत्यं । लोकव्यापाररहितं । यं पुत्रेत्याजुहाव । तदा ॥ तन्मयतया । वेदव्यासात्मतयेव । तरवोऽपि ॥ नेदुः । प्रतिध्वनिं चक्रुरिति यावत् । अनेन वेदव्यास ध्वनेरत्युच्चत्वं ज्ञापितं भवति ॥ तं सर्वभूतहृदयं । सर्वभूतानां हृदि अंतःकरणे । अहंकारात्मकरुद्रावतारत्वात् । अभिमानित्वेन अयते तिष्ठतीति सर्वभूतहृदयं ॥ मुनिं । शुकमानतोऽस्मि ॥ २ ॥ यः ॥ अखिलश्रुतिसारं । अखिलश्रुतिमुख्यार्थभगवत्प्रतिपादकं ॥ एकं । पुराणेषु मुख्यं ॥ अध्यात्मदीपं । अध्यात्मप्रमेयप्रकाशकं । ॥ पुराणगुह्यं । पुराणेषु गोप्यं । सर्वश्रवणायोग्यं भागवताख्यं पुराणं ॥ अंधं । अंधत्वापादकं तमोज्ञानं ॥ अतितीर्षतां । अतिशयेन तर्तुमिच्छतां ॥ संसारिणां । जीवानां । करुणया आह । तं मुनीनां गुरुं व्याससूनुं शुकं ॥ अखिलश्रुतिसारं । सकलवेदमुख्यप्रतिपाद्यं ॥ एकं । समाभ्यधिकशून्यं । तमोंऽधमतितीर्षतां ॥ अध्यात्मदीपं । सर्वाधिकस्वात्मप्रकाशकं ॥ स्वानुभावं । स्वरूपभूतमहासामर्थ्ययुक्तं । नारायणाख्यं ब्रह्म ॥ चोपयामि । शरणंगच्छामीति । एतेन शुकाचार्यनमस्कारशरणगमनयोरिव नारायणशरणगमननमस्कारयोरपि कर्तव्यत्वात् । नारायणं नमस्कृत्येति नारायणनमस्कारमात्रकरणमनुपपन्नमिति परास्तं ॥ ३ ॥ सत्तामात्रमित्यस्य सद्भाववाचिनः शब्दाः सर्वे ते सुखवाचका इत्यादि वचनेन सत्तादिवाचिनां सर्वेषां शब्दानामानंदवाचित्वाभिधानात् । सत्ता आनंदः

तन्मात्रमित्यर्थः । तात्पर्यं पैंगिश्रुनेरर्थः ॥ अथ कस्मादुच्यते सत्तेति नंदाति नंदयति चेतीति । सत्तामात्रमित्यनुवादः आनंदमात्रमिति व्याख्यानं । सत्ताशब्दस्यानंदार्थत्वे प्रमाणमाह ॥ तथाचेति । अत्र सत्ताशब्दे तल् प्रत्ययः स्वार्थे । अतः सत्ताशब्दः सद्वाची । ब्रह्म सत्तेति सदिति कस्मादुच्यते । यस्माद्ब्रह्म नंदति नंदयति । अथ तस्मात्सदित्युच्यत इति । एतेन सत्ताशब्दस्यानंदार्थकत्वमुक्त्वा सत्ता-शब्दास्यानंदविशिष्टार्थकत्वे प्रमाणोदाहरणमयुक्तामिति परास्तं ॥ १२ ॥ इति श्रीभागवतटिप्पण्यां द्वितीयाध्यायः ॥ १–२ ॥

॥ हरिः ॐ ॥ ॥ मायागुणैः । प्रकृतिविकारैः । महदादिभिः आत्मनि । आत्मना हरिणा विरचितं ॥ एतत् । जडरूपं विश्वं । ॥ अरूपस्य । प्रकृतिर्विकृतिरूपरहितस्य ॥ चिदात्मनः । केवलज्ञानस्वरूपस्य भगवत आरोपितं रूपं । उत्पादितप्रतिमारूपमिति यावत् । इदं प्रमेयं ॥ हि । प्रमाणप्रसिद्धं । अत्र दृष्टांतमाह ॥ यथेति । यथा ॥ नभसि । आकाशे । मेघौघाः ॥ आरोपिताः । आकाशाच्छादकत्वेन आकाशोपरिस्थिताः । यथा वा ॥ अनिले । वायौ । पार्थिवो रेणुः ॥ आरोपितः । वाय्वाच्छादकत्वेन वायो-रुपरि स्थितः । एवं भगवतोंऽडं विश्वमाच्छादकत्वेन स्थितं । ननु विश्वस्य प्रतिमारूपत्वे कैश्चिद्विश्वस्य साक्षाद्रूपत्वं कथं ज्ञायत इत्यत आह ॥ एवमिति । एवमबुद्धिभिरित्यन्वयः ॥ एवमबुद्धिभिः । भगवत्साक्षाद्रूपं चिदानंदात्मकमिति ज्ञानरहितैः । कैश्चित् ॥ द्रष्टरि । सर्वज्ञे भगवति । ॥ दृश्यत्वं । जडरूपत्वं ॥ आरोपितं । कल्पितमिति ॥ ३०–३१ ॥ इति श्रीभागवतटिप्पण्यां तृतीयाध्यायः ॥ ॥ १–३ ॥ ॥ ॥

॥ हरिः ॐ ॥ ॥ अत्र मन्यमानस्येत्यनेनोच्यमानं वृद्धिन्हासादिवर्जिततया सर्वदाभूतस्यैव ज्ञानस्य भवनसंपादनपटीयस्या-चिंत्यया शक्त्या चोपपन्नं द्रष्टव्यं ॥ ३१ ॥ इति श्रीभागवतटिप्पण्यां चतुर्थोध्यायः ॥ १–४ ॥ ॥

हरिः ॐ ॥ ॥ वायसं तीर्थमित्यस्य वयोमात्रानुजीविशास्त्रं । वय इत्युपलक्षणं । काकवयोदंतादिमात्रप्रतिपादकं शास्त्र-मित्यर्थः ॥ १० ॥ मुनयो यद्यपि शुश्रूषमाणेषु च तुल्यदर्शनास्तथापि शुश्रूषमाणेऽल्पभाषिणि मयि कृपां चक्रुरिति ॥ २४ ॥ हे महामुने । अहं यया मत्या ॥ एतत्सदसत् । कार्यकारणात्मकं जगत् । मयि स्थिते परब्रह्मणि ॥ स्वमायया । स्वास्मिन्स्थयितामिति ब्रह्मण इच्छया ॥ कल्पितं । स्थितमिति पश्ये सा मतिस्तदा ॥ तस्मिन् । परमहंसधर्मे । लब्धरुचेर्मम ॥ प्रियश्रवसि । नारायणे । अस्खलिता जातेति ॥ २७ ॥ एवं नृणां सर्वे ॥ क्रियायोगाः । क्रियालक्षणोपायाः । संसृतिहेतवः । त एव क्रियायोगाः ॥ परे । ब्रह्मणि । भगवत्तोषार्थं ॥ कल्पिताः । समर्पिताः । भगवत्तोषमुत्पाद्य भक्तिज्ञानद्वारा ॥ आत्मविनाशाय । मोक्षाय । कल्पंते । ननु

कर्मणां भगवत्तोषणं विना भक्तिज्ञानद्वारा मोक्षसाधनत्वं किं न स्यादित्यत आह ॥ यदत्रेति । ॥ यत् । यस्मात्कारणात् ॥ भक्तियोग-समन्वितं ज्ञानं । परोक्षज्ञानमपरोक्षज्ञानं च ॥ तदधीनं । भगवदधीनं । इत्येतत् ॥ हि । प्रमाणप्रसिद्धं । तत्तस्माद्भगवत्परितोषणं कर्म तदेव ॥ अत्र । कर्मभूमौ । साधुभिः क्रियते । अतः कर्माणि भगवत्परितोषणमुत्पाद्यैव मोक्षसाधनानीति ॥ ३४–३५ ॥ केशवो मे ॥ ज्ञानमैश्वर्यं । ज्ञानाख्यं भाग्यं । स्वस्मिन् ॥ भावं । भक्तिं । चादादिति ॥ ३९ ॥ इति श्रीभागवतटिप्पण्यां पंचमोध्यायः ॥ १–५ ॥ ॥ ॥

॥ हरिः ॐ ॥ ॥ सा माता यद्यपि मम योगक्षेममिच्छति तथापि यतोऽस्वतंत्राऽतः ॥ कल्पा । समर्था । नासीत् । साऽस्वतंत्रेत्युक्त्या गृहस्वामिनां स्वातंत्र्यं प्रतीयतेऽतआह ॥ ईशस्येति । तथा दारुमयी योषा पुरुषस्य वशे तिष्ठति तथा ॥ लोकः । आब्रह्मस्तंबपर्यंतः सर्वात्मकः ॥ ईशस्य । नारायणस्य । वशे तिष्ठतीत्येतत् ॥ हि । प्रमाणप्रसिद्धं । अतो गृहस्वामिनां किंचित्स्वा-तंत्र्यमिति ॥ ७ ॥ अहं ॥ मनःकांतं । मनोहरं । सुखावहं भगवतो यद्रूपमद्राक्षं तत्सहसाऽपश्यन् ॥ कैवल्यात् । प्राप्तान्मोक्षात् । ॥ उत्तस्था इव । उत्थित इव ॥ दुर्मनाः । दुःखितांतःकरणः । अभूवमिति ॥ २२ ॥ यद्यप्यहं ॥ गिरां । भगवत्कर्तृकां गिरां । ॥ अगोचरो । अविषयः । तथापि विजने एवं पतंतं मां दययाऽऽहेत्यर्थः॥२४॥ इति श्रीभागवतटिप्पण्यां षष्ठोध्यायः ॥१–६॥ ॥ ॥

॥ हरिः ॐ ॥ ॥ द्रौणिः । अश्वत्थामा ॥ अस्य । समीपस्थस्य ॥ स्वात्मनः । स्वस्यानाद्यनंतकाले स्वामिनः श्रीकृष्णस्यैव । विप्रियं । अथवा ॥ स्वभर्तुः । दुर्योधनस्य । विप्रियं । प्रयोजनाभावात् विप्रियमिव प्रयोजनाभावसाम्यात् । उपचारेण विप्रियमेतत् । कृष्णासुतानां हननं ॥ भर्तुः । दुर्योधनस्य । प्रियमिति पश्यन् स्वपतां कृष्णासुतानां शिरांस्यपाहरत्सीत्यर्थः ॥ १४ ॥ कैवल्य इत्यस्य सर्वोत्तमइत्यर्थः । सर्वोत्तमत्वस्य भगवत्स्वरूपत्वात्कैवल्ये आत्मनीति सामानाधिकरण्यमुपपन्नं । अर्श आदिभ्योऽच्वा अस्मिन्पक्षे कैवल्य इत्यस्य सर्वोत्तमत्वविशिष्ट इत्यर्थः । एतेन भागवतः सर्वोत्तमत्वविशिष्टत्वात् । केवले आत्मनीति वक्तव्यमिति दूषणं परास्तं ॥ २३ । हे वीर अर्जुन । कुलपांसनो द्रौणिः ॥ भर्तुः । दुर्योधनस्य च ॥ विप्रियं । प्रयोजनाभावसाम्याद्विप्रियवत्स्थितं । शिशूनां हननं कृत-वानित्यर्थः ॥ १९ ॥ यतः शिशूनां हननं ॥ भर्तुः । दुर्योधनस्यार्थे ॥ अर्थाय । प्रयोजनाय । भवति ॥ आत्मनः । स्वस्य । चार्थाय न भवति । अतो यः सुप्तान् शिशून्वृथाऽहनत्तस्य द्रौणेर्वधः श्रेयान्स्मृत इति चामर्षितो भीमः ॥ तत्र । तस्यामवस्थायां । आहेति ॥ ५१ ॥ इति श्रीभागवतटिप्पण्यां सप्तमोध्यायः ॥ १–७ ॥ ॥ ॥

॥ हरिः ॐ ॥ ॥ अजातशत्रोरित्यस्य अजाताः शत्रवः शातयितारो यस्य स अजातशत्रुस्तस्येत्यर्थः । एतेन दुर्योधनादि-शत्रूणां जातत्वात् । अजातशत्रुत्वं धर्मराजस्यानुपपन्नमिति परास्तं ॥ ८ ॥ भक्तियोगविधानार्थमित्यस्य भक्तिः माहात्म्यज्ञानपूर्वकसुदृढ-स्नेहः योगो ध्यानयोगो विधानां विहितकर्म एतेषां विषयमित्यर्थः ॥ २३ ॥ अनादि निधनं । आदि निधनं शल्यं ॥ सर्वत्र समं चरंतं । तत्तद्योग्यतानुसारेण सर्वेषु समं यथा भवति तथा चरंतं ॥ ईशानं । संहारकस्य रुद्रस्यापि चेष्टकं परं कालं त्वां मन्ये । ननु प्राणिनामिव परमेश्वरस्य वैषम्यं किं न स्यादित्यत आह ॥ भूतानामिति । भूतानामित्यस्यावृत्तिः ॥ यत् । यस्मात्कारणात् ॥ भूतानां । प्राणिनां ॥ मिथः कलिः । परस्परवैषम्यनिमित्तकं कलहः ॥ भूतानां सकाशात् । भौतिकदेहसंबंधात् । भवति । अतः प्राणिनामेव वैषम्यं न त्वीश्वरस्य । भूतसंबंधाभावेन वैषम्यनिमित्तकलहाभावात् । अतः समं चरंतामीति युक्तमिति ॥ ३१ ॥ हृषीकाणामीशितुरिव । इंद्रियाणां नियामकस्य अंतःस्थितरूपस्य । तव सांनिध्ये साति यथा सर्वे नामरूपयुक्ता भवंति तथा ॥ यर्हि । यदा । भवतो दर्शनं तदा ते प्रसिद्धाः पांडवा वयं यदुभिः सह नामरूपाभ्यां युक्ता भवेम इति ॥ ४१ ॥ इति श्रीभागवतटिप्पण्यांऽष्टमोध्यायः ॥ १–८ ॥ ॥ ॥

॥ हरिः ॐ ॥ सुराकृतमित्यस्य मद्यकृतपिष्टगुलिकादिकमित्यर्थः ॥ ७ ॥ अतोकवतीति पदभेदं विधवेति विशेषपूरणं च कृत्वा पुत्रशल्या भर्तृशून्या स्त्रिया यथा बहून्प्राप्नोति । यथा युष्मत्कृते बहून्क्लेशान्प्राप्तेत्यर्थो वक्तव्यः ॥ २० ॥ अत्रैवं योजना । भीष्मस्त-दोत्तरायणप्राप्तिसमये गिरमुपसंहृत्यलसत्पीतपटे चतुर्भुजे पुरःस्थिते आदिपुरुषे नारायणावतारे कृष्णे ॥ अमीलितदृक् । प्रफुल्ललोचनः सन् । विमुक्तसंगं मनः ॥ व्यधारयत् । विशेषेण स्थापितवान् । ननु देवतांतर परित्यागेन मरणकाले नारायणावतारे कृष्णे मनः कुत स्थापितमित्यत आह ॥ सहस्रणीरिति । यतः अतः कृष्ण इति पदानामध्याहारः । सहस्रशब्दोऽनंतवाची । ततश्च यतः कारणात् कृष्णः सहस्रणीः अनंतान्योग्यान् जीवान् मुक्तिं प्रति नयति अत इत्यर्थः । मुक्तिदातृत्वेन कृष्णे मनः स्थापनं युक्तमिति भाव इति ॥ ३७ ॥ इति श्रीभागवतटिप्पण्यां नवमोऽध्यायः ॥ १–९ ॥ ॥

॥ हरिः ॐ ॥ प्रणिध्युपात्तामित्यस्य आमात्यामंत्रिणोदूता अंगरक्षकाः पुरोहिताः पुरस्थाजनपदस्था इति सप्तप्रणिधिभिः ॥ उपात्तां उपादेयत्वेन स्वीकृतमित्यर्थः ॥ ४ ॥ कुरुपुरे ॥ तत्रतत्र । तत्तन्मार्गे ॥ द्विजेरिताः । द्विजप्रोक्ताः ॥ सत्यः । यथार्थविषयाः ॥ आशिषः । दुष्टान् जहि जहि । साधून्पालय पालय । अस्मान् अनुग्रहाणेत्यादिरूपाशीर्वचः । अश्रूयंत ता वाचः ॥ निर्गुणस्य ।

सत्त्वादिगुणकार्यीडावस्थानरहितस्य । अंडाद्बहिः स्थितस्येति यावत् ॥ नानुरूपाः । अननुकूला इव ॥ गुणात्मनः । गुणं सत्त्वादि-गुणकार्यांडं ॥ आप्नोति । तत्रतिष्ठतीति यावत् । तस्य निर्गुणस्य च अनुरूपाश्च अनुकूला एव । एतेन सर्वा आशिषो भगवत्सर्वरूपा-णामनुकूला एवात आशिषो निर्गुणस्य नानुरूपा इत्यस्युक्तमिति परास्तं ॥ २० ॥ शास्तिकृत् । सकलशासनकर्ता । ॥ अनामरूपा-त्मनि । अप्रसिद्धगुणत्वादनाम्नि अप्राकृतरूपत्वादरूपे आत्मनि स्वस्मिन्नाधारे ॥ रूपनामनी । रूपनामात्मकं प्रपंचं ॥ विधित्समानः । स्रष्टुमिच्छन् । स भगवानेव ॥ भूयः । पुनः । सृष्टिकाले ॥ निजवीर्यचोदितां । निजवीर्येण प्रेरितां ॥ सिसृक्षतीं । सर्जनेच्छावतीं ॥ स्वजीवमायां । स्वरूपभूतजीवसंबंधकेच्छारूपां जीवबंधकमहालक्ष्मीरूपां जीवबंधकजडरूपां च प्रकृतिं । अनुससारेति । ईश्वरेच्छाजडप्रकृत्याः सिसृक्षा नाम सर्जनोन्मुखत्वमिति द्रष्टव्यं ॥ २३ ॥ सात्वत । इत्यस्य सात्त्विकानामनुग्राहक इत्यर्थः । सत्त्वगुणवाचकत्वात्सत्त्वशब्दात्त-स्येदमित्यर्थेऽण् प्रत्यये निष्पन्नात्सात्विकवाचिसात्वशब्दात् अनुगृण्हातीत्यर्थे तद्धिता इति बहुवचने ज्ञापिते तत्प्रत्यये सात्वत इति रूप-मित्यंगीकारात् ॥ २६ ॥ यत् । यस्मात् । यत्प्रजा या भूर्यन्निष्ठाः प्रजाश्च ॥ अनुग्रहेक्षितस्मितावलोकं । अनुग्रह इति सप्तम्याऽलुक् । अनुग्रहार्थं क्षितं उषितं स्थितमिति यावत् । क्षि निवास गत्योरिति धातुव्याख्यानात् । स्मितं मंदहासस्तेन युक्तोऽवलोको यस्य । तं स्वपतिं श्रीकृष्णं नित्यं पश्यंति । तस्मात् । स्वर्यशसस्तिरस्करी । कुत्रास्थली द्वारावती तस्या भुवो भूदेव्या भूलोकस्य प्रजानां च पुण्ययशस्करी पुण्यकीर्त्युभयकरी ॥ अहो बत । आश्चर्यमिति ॥ २८ ॥ कृष्णो यदा ॥ सायं । सायंकालसमये । पश्चाद्दिशं भेजे । तदा ॥ गविष्ठः एकवचनं बहुवचनार्थे । द्युलोकस्थितसूर्यवाचकगविष्ठशब्देन तत्संबंधिरश्मयो लक्ष्यंते । गविष्ठसूर्यसंबंधिरश्मयः ॥ गां । उदकं गतः सूर्यः । अस्तंगत इति यावदिति योजना ॥ ३७ ॥ चलाऽपि यं श्रीर्न जहाति कर्हिचिदित्यस्य यमित्यत्र लिंगव्यत्ययमंगी-कृत्य चला चंचलाऽपि श्रीः यं यत् अंघ्रियुगं कर्हिचित् कदाचिदपि न जहातीत्यर्थो वक्तव्यः ॥ ७० ॥ नन्वीश्वरस्य जीववत्सत्त्वादि-गुणयोगांगीकारे किं बाधकमित्यत आहेत्यवतार्य प्रकृतिस्थोऽपि भगवान्सदा ॥ आत्मस्थैः । स्वाधारैः ॥ तद्गुणैः । प्रकृतिगुणैः ॥ न युज्यते । न बध्यते । इति यत् तदेवेशस्य ॥ ईशानं । ईशत्वं । तथा चेश्वरः सत्त्वादिगुणैर्बध्यत इत्यंगीकारे मे माता वंध्येतिवद्व्याहति-रिति भावः । अत्र दृष्टांतमाह ॥ यथेति ॥ तदाश्रया । भगवद्विषया बुद्धिः । तद्गुणैर्यथा न युज्यते तथेश्वरस्तद्गुणैर्न युज्यते । प्रकृति-स्थानां ज्ञानिनामपि न प्रकृतिगुणसंगः किमीश्वरस्येति यावदिति व्याख्येयं ॥७५॥ इति श्री भागवतटिप्पण्यां दशमोऽध्यायः ॥१-१०॥

॥ हरिः ॐ ॥ अत्रेयं योजना । हे द्विज शौनक यथा ॥ कामातुरस्य । कामबाणपीडितस्य ॥ इतरेऽर्थाः । स्त्रीव्यतिरिक्ता

धनादिरूपार्थाः ॥ मुदं । संतोषं । नाधिहरंति । यथा वा ॥ क्षुधितस्य । क्षुधापीडितस्य ॥ इतरेऽर्थाः । अन्नव्यतिरिक्ता वनितादि-रूपार्थाः । मुदं नाधिहरंति । तथा ॥ मुकुंदमनसः । श्रीकृष्णमनसः । धर्मराजस्य ॥ इतरेऽर्थाः । कृष्णव्यतिरिक्ताः संपदादिरूपार्थाः । मुदं नाधिजग्मुः। ननु संपद्रादीनां संतोषहेतुत्वाभावे पुरुषार्थत्वं न स्यादित्यत आह॥ किं त इति। मुकुंदमनसो मुकुंदमनसां ते संपदादयः अर्थाः पुरुषार्थाः । किं । किमाक्षेपे । न भवंत्येव । किंतु कामातुरस्य । कामातुराणां विषयासक्तानां कृष्णांतःकरणरहितानामिति यावत् । ते संपदादयोऽर्थाः पुरुषार्था इति ॥ ६ ॥ तीर्थवित् । धर्मशास्त्रज्ञानवान् । ॥ सः । धर्मराजः ॥ प्रजातीर्थे । सत्प्रजातीर्थे । गंगातीर्थमिव सर्वकुलपवित्रीकरणात् । प्रजातीर्थे तस्मिन् । सप्तमीतादर्थ्ये । प्रजातीर्थार्थे । उत्पन्नस्य गंगातीर्थे समानस्य पौत्रस्या-भ्युदयार्थमिति यावत् । विप्रेभ्यः स्वन्नंच प्रादादित्यर्थः ॥ १४ ॥ इति श्रीभागवतटिप्पण्यामेकादशोऽध्यायः ॥ १--११ ॥ ॥ ॥

॥ हरि ॐ ॥ ॥ प्रत्यजग्मुरित्यस्य धृतराष्ट्रादय आगतान् ॥ प्राणान्प्रति । मुख्यप्राणस्वरूपप्राणापानव्यानोदानसमानाख्य पंचप्राणान्प्रति । तन्निमित्तीकृत्येति यावत् । ॥ तन्व इव । शरीराणीव । प्रहर्षेणोत्थिताः संतः ॥ प्रत्यजग्मुः । आभिमुख्येन वेगेन जग्मु-रित्यर्थः । एतेन तत्प्राणे प्रपन्न उदातिष्ठदित्यादि श्रुत्या मुख्यप्राणस्यैकस्यैव शरीरोत्थितहेतुत्वस्य समर्थितत्वात्प्राणानिति बहुवचनमनु-पपन्नमिति परास्तं ॥ ५ ॥ विना यदुकुलक्षयमित्यस्य । एष्यंतमित्यध्याहृत्य एष्यंतं यदुकुलक्षयं विनेत्यर्थो वक्तव्यः । आचार्यैस्ता-त्पर्यस्य वेदतुल्यत्वं सूचयितुं यदुकुलक्षयमेष्यादिति लिंगव्यत्ययेनोक्तं ॥ १२ ॥ वाससी इवेत्यस्य स्वस्वीकृतपरिधानीयोत्तरीयवस्त्रे इवेत्यर्थो वक्तव्यः ॥ २५ ॥ स्वैरज्ञातगतिरित्येतत् स्वैः स्वकीयैः अज्ञातं स्थलं प्रति गतिर्यस्य स तथा । विविक्तगतिरिति यावत् । इति व्याख्येयं ॥ २८ ॥ पितृव्यौ क्व गताविति इत्येतद्वाक्यं । न तु धृतराष्ट्रेण वने स्थीयत इति सिद्धत्वात् । गावल्गणे क्व नस्तात इति पितृव्यः क्व गतः सुहृदिति च पितृव्यः क्व गत इति तात्पर्यज्ञापनार्थं द्विवारं गमनप्रश्नः । गंगायां दुःखितोऽपतदिति गंगापतनप्रश्न-श्चानुपपन्न इति संजयस्य हार्दशंकां गर्भस्रावेणैव परिहर्तुं प्रष्टव्यांतरं पृच्छतीत्यवतार्य ॥ पितृव्यौ । गांधारीधृतराष्ट्रौ ॥ इतः । इह वने । प्रतिदिनं वंदनकाले दृश्यमानौ अद्य क्व कुतः गतौ । अदर्शनमिति शेषः । अदर्शनं गतौ कुतो मया न दृश्येते इति यावत् । इति व्याख्येयं । तदुक्तमाचार्यैः ॥ क्व गतावित्यदृष्टापेक्षयेति । तस्यार्थः । क्व गताविति प्रश्नः । अदृष्टापेक्षया । अदर्शनापेक्षयाऽदर्शन-विषयक इति । एतेन गमनप्रश्नमात्रस्यादर्शननिमित्तकत्वस्य सिद्धत्वात् । क्व गताविति गमनप्रश्नोऽदर्शनापेक्षयेत्यनुपपन्नमिति परास्तं । एतेनैव क्व गताविव्यस्यापि गमनप्रश्नत्वात् । त्रिरुक्तिस्तात्पर्यार्थेति वक्तव्ये द्विरुक्तिस्तात्पर्यार्थेत्युक्तिरयुक्तेति च दूषणं परास्तं ॥ ३४ ॥

तमेव भजेति शेषपूरणेन भगवान्नारायणः ॥ मायया । सामर्थ्येन ॥ अंतः । बहुरूपैर्नियामकतयांऽतःस्थित्वा रमणं करोति ॥ अनंतरः । बहुरूपैर्नियामकतया बहिः स्थित्वा रमणं करोति । इत्येतत् ज्ञानिनां भाति । अतो ज्ञानिप्रत्यक्षसिद्धं । ॥ उरुतां । उत्कृष्टतां । पश्यन् तमेव भजेति व्याख्येयं ॥ ४८ ॥ स आस्ते विगतेक्षण इत्येतत् सह भ्रात्रा गांधार्या च स्वभार्ययेत्यस्यानुवृत्तिं त्वद्गमनकाल इति शेषं चांगीकृत्य ॥ विगतेक्षणः । विगतविषयेक्षणः । धृतराष्ट्रः स्वभार्यया गांधार्या च शब्दात्कुंत्या च भ्रात्रा विदुरेण च सहत्वद्गमनकाले त्वद्गमनकालपर्यंतं वन ॥ आस्ते । आसीत् । त्वद्गमनानंतरं विदुरस्य त्वयि प्रवेशो जात इति भाव इति व्याख्येयं ॥ ता० ॥ त्वद्गगमन-काले भ्रात्रा विदुरेण सह आस्ते । न तु आस्ते इत्याद्यनुपपन्नं । वर्तमानकालेऽभावादित्यत आह ॥ आस्तेति । त्वद्गमकाले भ्रात्रा विदुरेण सह आस्ते । ननु आस्ते एतेन धृतराष्ट्रो गमनकाले भ्रात्रा सह गत इत्यस्यार्थस्य धृतराष्ट्रः सह भ्रात्रा गत इति भागवतेनैव स्पष्टं लाभात् । गमनकाले भ्रात्रा सहेति तात्पर्यं व्यर्थमिति चोद्यं निरस्तं ॥ ५२ ॥ इति श्रीभागवतटिप्पण्यां द्वादशोऽध्यायः ॥ १-१२ ॥

॥ हरिः ॐ ॥ पितृमात्रोः पुत्रैः सह सुहृदादीनां परस्परं कलहमित्यर्थः । एतेन दंपतीनामित्यनेनैव पितृमात्रोः परस्परं कलहस्य प्राप्तत्वात् । पितृमात्रिति पुनरुक्तमिति दूषणं परास्तं ॥ ४ ॥ हे तात चिरोषितः पूर्वं चिरोषित इति हेतोरतिपरिचर्यादिदानीमनलब्ध-मानोऽवज्ञातः किं वेत्यर्थः ॥ ३९ ॥ हे अर्जुन ॥ हि । यस्मात् । ते ॥ रुक् । कांतिः ॥ अन्यथा । अथ तस्मात् ॥ हृदयेन । हृद्गतेन । मनोहरेणेति यावत् ॥ आत्मबंधुना । विशेषतः स्वात्मबंधुना । नित्यं ॥ प्रेष्ठतमेन । अत्यंतप्रियतमेन कृष्णेन रहितोऽसीति हेतोरात्मानं ॥ शून्यः । मृतः । असि । पुरुषव्यत्ययेनास्मीति मन्यसे ॥ कच्चित् । किमिति ॥ ४४ ॥ इति श्रीभागवतटिप्पण्यां त्रयोदशोऽध्यायः ॥ १-१३ ॥ ॥

॥ हरिः ॐ ॥ यथा ॥ उक्थेन । प्राणेन । रहितः ॥ एषः । देहः ॥ मृतकः । हतप्रभः । प्रोच्यते । उपलक्षणमेतत् । दृश्यते च । एतत् ॥ हि । प्रसिद्धं । यथा ॥ यस्य । कृष्णस्य । क्षणवियोगेन ॥ लोकोऽप्रियदर्शनः । मामप्रियं हतप्रभं पश्यतीत्यप्रियदर्शनः । उपलक्षणमेतत् । अप्रियवचनश्च इत्येतद्धि प्रसिद्धमिति । एतेन उक्थेन रहितो मृतक इत्येतत्पुनरुक्तं । दृष्टांते मृतकः प्रोच्यते यथेत्युक्त्वा दार्ष्टांतिके लोकोऽप्रियदर्शन इत्यभिधानमसंगतमिति परास्तं ॥ ६ ॥ इति श्रीभागवतटिप्पण्यां चतुर्दशोऽध्यायः ॥ १--१४ ॥ ॥

॥ हरिः ॐ ॥ संच्छिन्नो द्वैतसंशयः । भगवतोऽन्यस्मात्प्रवृत्त्यादिकं भवतीति । एककोटिकानवधारणज्ञानं यस्य स तथोक्त

इति । एतदेवाभिप्रायेणाचार्यैरुक्ततात्पर्यार्थः ॥ ज्ञानिनामपि । अपरोक्षज्ञानिनामपि । कदाचित्प्रारब्धकर्मणैव ॥ भागवंत विना । नारायणं विना ॥ अन्यत्र । अन्यस्मात् ॥ प्रवृत्यादिप्रकाशनं । प्रवृत्यादि भवतीति ज्ञानं । स्यात् । सैवद्वैतदृष्टिः । हे देव मे तां ॥ द्वैतदृष्टिं । द्वैतविषयकैककोटिकसंशयं ॥ ज्ञानवरासिना । उद्भूतापरोक्षज्ञानवरासिना । छिंधीति ब्राह्मे । यदुक्तं तदेव संच्छिन्नद्वैतसंशयत्व भागवते विवक्षितमिति । एककोटिकसंशयोपपादनं त्वस्मत्स्वामिकृताभिनवामृतग्रंथे द्रष्टव्यं । एतच्छ्लोक एव लीनप्रकृतिर्नैर्गुण्यात् । अलिंगत्वादसंभव इत्यत्र अलिंगत्वादित्यस्य लिंगदेहवाचकलिंगशब्दस्य सूक्ष्मशरीरमात्रोपलक्षत्वमंगीकृत्य लिंगदेहब्रीह्यादिप्रवेशानुकूलदेहरूपसूक्ष्मशरीरराहित्यादित्यर्थो वक्तव्यः । एतदेवाभिप्रेत्याचार्यैरलिंगत्वादित्यस्यासूक्ष्मशरीरत्वादित्यर्थ उक्तः । एतेन लिंगशब्दस्य लिंगदेहवाचकत्वात् । अलिंगत्वादित्यस्यालिंगशरीरत्वादित्यर्थो वक्तव्यः । असूक्ष्मशरीरत्वादित्यर्थकथनमनुपपन्नमिति दूषणं परास्तं ॥ ३ ॥ आत्मनोऽनवमगुणैरित्यस्य गुणैर्हरिभक्त्यादिगुणैर्निमित्तैरात्मनोऽनवमं समं पौत्रत्वे योग्यमित्यर्थः ॥ तात्पर्यार्थः । अनवमित्यनेनोक्तं ॥ अनवमत्वं । समत्वं । स्वपौत्रत्वे योग्यत्वमेव । न तु स्वसमानत्वं । तस्य बाधितत्वात् । पौत्रे स्वसमत्वस्य बाधितत्वे समत्ववाचकशब्देन स्वपौत्रत्वयोग्यत्वं ग्राह्यमित्यत्र प्रमाणमाह ॥ इद्रादीति । इंद्राद्युत्तमता । आदि पदेन यमादेर्ग्रहणं । मनुष्यकुलोत्पन्नेंद्रयमाद्युत्तमता । स्वके कुलोत्पन्नानामन्येषां नीचानां यत्र निगद्यते तत्रेंद्रयमाद्युत्तमताया बाधितत्वात् स्वके । कुले इंद्रयमादिकुले उत्पन्नानां सकाशादुत्तमत्वं निगद्यते । यत्रेंद्रयमादि समता वा नीचानां निगद्यते तत्रेंद्रयमादिसमताया बाधितत्वात् । स्वके कुले उत्पन्नैः समता वा उत्पत्त्यादि योग्यता । आदि शब्देन पुत्रत्वपौत्रत्वादेर्ग्रहणं । इंद्रयमादिवत् । प्रजाकर्तृकोपास्तियोग्यतेंद्रयमादिपुत्रत्वपौत्रत्वादियोग्यता वा निगद्यते । प्रकृते च समतावाचकस्यानवमशब्दस्य पौत्रमिति पौत्रशब्दसमभिव्याहारात् । पौत्रत्वयोग्यत्वमेवार्थो विवक्षित इति ॥ ७ ॥ इति श्रीभागवतटिप्पण्यां पंचदशोऽध्यायः ॥ १--१५ ॥ ॥

॥ हरि ॐ ॥ तस्य ॥ नृपः । परीक्षिद्राजः ॥ दिग्विजये । दिग्विजयवेलायां ॥ कस्य हेतोः । कस्यापराधाद्धेतोः ॥ निजग्राह । निग्रहं कृतवान् । ननु घ्नंतं गोमिथुनमित्यनेन गोहननरूपापराधस्योक्तत्वात् । कस्य हेतोरिति प्रश्नोऽनुपपन्न इत्यत आह ॥ नृ देवेति । नृदेवचिन्हधृक् ॥ शूद्रः । कर्मणा शूद्रः । कालिर्गा पदाऽहनत् । इति यः पादकरणगोहननरूपोऽपराधोऽसौ ॥ कः । कियान् । अल्प एवेत्यर्थः । दिग्विजयवेलायामल्पापराधं निमित्तीकृत्य कलिनिग्रहणं महत्वापादकं न भवतीति भावः । एतदेवाभिप्रेत्याचार्यैः कोऽसावित्याक्षेपः । कलिमित्युक्तत्वात् । तस्यार्थः । कोऽसावित्यनेन हननापराधाक्षेप एव क्रियते । न तु हननापराधकर्तृप्रश्नः । गोहंता कलिरिति निश्चि-

तत्वात् । हंता कलिरिति निश्चयः कुत इत्यत आह ॥ कलिमितीति । पदा गोमिथुनं घ्नंतं कलिमित्युक्तत्वादिति । एतेन यथा कलिमित्युक्तत्वात् । गोहननकर्तृप्रश्नोऽनुपपन्नः । तथा कलिमित्युक्तत्वादेव गोहननकर्ताक्षेपोप्यनुपपन्नः । न च यत आक्षेपो नामात्र निंदा । असौ कलिः कः कुत्सित इति अतः कलिमित्युक्तत्वेऽपि कर्ताक्षेपउपपन्न इति वाच्यं । कलेः कुत्सितत्वस्य सर्वसंमतत्वेन कुत्सितत्वोक्तेः । प्रयोजनाभावात् । इति परास्तं । न हननक्रियाक्षेप इत्यंगीकारात् । अत एव कलिं प्रविष्टं निजचक्रवर्तित इत्यादिना कलेर्बंधनहेतुभूतस्वराष्ट्रप्रवेशादिरूपमहापराधं वक्ष्यति ॥ ५ ॥ हे महाभाग तत्कलिबंधनं यदि ॥ विष्णुकथाश्रयं । नारायणकथाश्रयं । यर्हि कथ्यतां । अथ ॥ अथवा ॥ तत्कलिबंधनं वा । यदि ॥ अस्य । विष्णोः । पदांभोजमकरंदलिहां सतां कथाश्रयं तर्हि कथ्यतां ॥ ६ ॥ ननु वैष्णवकथाश्रयत्वाभावेऽपि कलिबंधनं वक्तव्यं किं न स्यादित्यत आह ॥ किमन्यैरिति ॥ यत् । यस्मात् । असदालापैः आयुषः ॥ असद्व्ययः । व्यर्थक्षयः ॥ तस्मादन्यैः । विष्णुवैष्णवकथानाश्रयैः ॥ असदालापैः । अमंगलालापैः । किमित्यर्थः । कलिबंधनस्य विष्णुवैष्णवकथाश्रयत्वाभावे तच्छ्रवणेनायुषोऽसद्व्ययः स्यादिति भावः ॥ तात्पर्यार्थः । अथत्वेत्यत्राथेति शब्दः पक्षांतरे वर्तते । वा शब्दो यद्यर्थे । कलिबंधनव्यतिरिक्तालापानामप्रसक्तत्वात् । किमन्यैरसदालापैरित्यनुपपन्नमित्यतस्तात्पर्यार्थमाह ॥ अन्यथा चेदिति । कलिबंधनं विष्णुवैष्णवकथाश्रयं न चेत् । तच्छ्रवणेनायुषोऽसद्व्ययः स्यादिति तात्पर्यार्थ इत्यर्थः । एतेन व्याख्येयपदाभावादन्यथा चेदिति व्याख्यानमनुपपन्नमिति परास्तं । वा शब्दस्य यद्यर्थत्वे प्रमाणमाह ॥ यद्यर्थे इतीति ॥ ७ ॥ येन भूमंडले स्थितेन कृष्णो न लोकसुखावहैश्चतुर्भिः पादैर्वर्तसे । यदा कृष्णो न भूमंडले स्थीयते तदा नियमेन चतुर्भिः पादैर्वर्तस इति व्याख्येयं । एतेन धर्मभूदेव्योः संवादकाले धर्मः पादैकेन चरित्रयुक्तत्वेन धर्मस्यैकपादत्वात् । चतुर्भिः पादैर्वर्तस इत्युक्तिरनुपपन्नेति परास्तं ॥ २६ ॥ इति श्रीभागवतटिप्पण्यां षोडशोऽध्यायः ॥ १-१६ ॥ ॥ ॥

॥ हरिः ॐ ॥ ॥ परीक्षिद्राजः मृणालधवलं बिभ्यंतमत एव मेहंतं शकृन्मुच्यंतमित्यर्थः । एतदेवाभिप्रेत्याचार्यैः । बिभ्यंतमिव मेहंतमित्युक्तं । एतेन कलिपीडया भयस्यावर्जनीयत्वात् । बिभ्यंतमिवेति भीतसादृश्याभिधानमयुक्तमिति परास्तं ॥ २ ॥ अथवा ॥ देवमायायाः । नारायणेच्छाया ॥ गतिः । स्थितिः । चेतसो वचसश्चाप्यगोचरेति ॥ नूनं । निश्चितमिति । पुरुषं तं न विजानीम इति त्वद्वाक्यस्याभिप्राय इति निश्चयः । ननु चेतसो वचसश्चागोचरा गतिरीश्वरस्य कथमंगीकर्तुं शक्यते । मानाधीनत्वान्मेय सिद्धेः । इत्यत उक्तं ॥ भूतानामिति । ब्रह्मादिभूतानामेव मायाया गतिरगोचरा । न तु भगवतः । अतो भगवद्गोचरत्वात् । ब्रह्माद्यविदिता देव-

मायागतिरंगीकर्तुं शक्यत इति । यद्यपि ब्रह्मादिदेवैर्देवमायागतिः किंचिज्ज्ञायते । तथाप्यल्पत्वादविवक्षया देवमायागतिर्ब्रह्मादिदेवानामगोचरंति वक्तुं शक्यते । ता० । तस्य नारायणस्य गोचरत्वेऽपि ॥ **भूतानां** । ब्रह्मादिभूतानां । देवमायागतिरगोचरेति ज्ञापयितुं वा पुरुषं तं न विजानीम इत्युक्तमिति । एतेन धर्मेण साकल्येन देवमायागतेरज्ञातत्वात् । तस्य गोचरत्वेऽप्यनुपपन्नमिति परास्तं । तस्येत्यनेन धर्मस्य परामर्शः । देव शब्दोक्तनारायणस्यैव परामर्श इत्यंगीकारात् ॥ २२ ॥ इति श्रीभागवतटिप्पण्यां सप्तदशोऽध्यायः ॥ १-१७ ॥ ॥ ॥

॥ हरिः ॐ ॥ ॥ **पुनर्भवमित्यस्य** अल्पप्रयत्नसाध्याल्पाधिकारिमोक्षमित्यर्थः । एतेन मोक्षापेक्षया भगवत्संगिसंगस्याधिकत्वे मोक्षसंपादनं व्यर्थमिति परास्तं । ता० अर्थः ॥ **अप्रयत्नात्** । अल्पप्रयत्नात् । अल्पाधिकारिणां जायमाना या सम्यक् स्वरूपतो व्यक्तिर्जननस्याभावश्च । मुक्तिरिति यावत् । ततोऽल्पाधिकारिणां मुक्तेः सत्संगतिर्वरेति । नन्वल्पाधिकारिणां मुक्तेः सत्संगतिर्वरेत्येतत्कुतः सत्संगतेरल्पाधिकारिणां मुक्तिरेव वरा किं न स्यादित्यत उक्तं ॥ **वृद्धिहेतोरिति** । अल्पाधिकारिमुक्तिसुखापेक्षया सत्संगतिजन्यसुखे वृद्धिराधिक्यमस्तीति हेतोरित्यर्थः । नन्वल्पाधिकारिमुक्तेः सत्संगतिर्वरेत्येतत्कुतो मुक्तिमात्रात्संगतिर्वरा किं न स्यादित्यतो वेदमुदितं ॥ **वृद्धिहेतोरिति** । सत्संगतिजन्यसुखापेक्षयोत्तमाधिकारिणां मुक्तिसुखे वृद्धिराधिक्यमस्तीति हेतोरित्यर्थः । ता० ४ स्कंधे । संगो भागवतैर्भूयान् अपुनर्भवमात्रतः । यतो विशिष्टमानंदं मुक्तौ जनयति स्फुटमिति । अस्यार्थः ॥ **अपुनर्भवमात्रतः** । अल्पमोक्षात् । अल्पाधिकारिणां मुक्तेरिति यावत् । भागवतैः संगो भूयानिति । नन्वल्पाधिकारिणां मुक्तेः सत्संगो भूयानिति कुतो मुक्तिमात्रात्सत्संगो भूयान्किं न स्यादित्यत आह ॥ यत इति । यतः कारणाद्भागवतैः संग उत्तमाधिकारिणा मुक्तेः सत्संगो भूयानिति कुतः । पूर्वं सुखं जनयति । तदपेक्षया मुक्तौ विशिष्टमधिकमानंदं जनयतीति स्फुटं निश्चितमित्यर्थः । नन्वल्पाधिकारिणां मुक्तेर्भागवतैः संगो भूयानिति कुतः । भागवतैः संगादल्पाधिकारिणां मुक्तेरेव भूयसी किं न स्यादित्यतो वाह ॥ यत इति । यतः कारणाद्भागवतैः संग उत्तमाधिकारिणां संसारावस्थायां मुक्तौ च । सप्तमी पंचम्यर्थे । अल्पाधिकारिणां मुक्तेर्विशिष्टमधिकमानंदं जनयतीति स्फुटमित्यर्थः ॥ १३ ॥ कौशिकीत्यस्य । कुशपाणिरित्यर्थः । कुश शब्दाद्युक्त इत्यर्थे ठक् प्रत्यये कौशिकः पाणिः सोऽस्यास्तीत्यर्थे इन्प्रत्यये कौशिकीरूपमित्यंगीकारात् । ता० । कुश एकः पाणिर्यस्य स कुशपाणिः कौशिकीत्यनेनोच्यत इति ॥ ३६ ॥ अत्र प्रभवोऽपिहीत्यतः परं मत्पुत्रस्तु परीक्षिद्राजा कृताल्पतिरस्कारं निर्मत्सीकृत्य मरणापादकशापप्रदानरूपमहाप्रतीकारं कृतवानिति शेषः । प्रकारांतरेण स्वपुत्रस्य पापित्वमुपपादयति

॥ तिरस्कृता इति । लोके ॥ तिरस्कृताः । अवमानिताः ॥ विप्रलब्धाः । वंचिताः ॥ शप्ताः । क्षिप्ताः ॥ हताः । ताडिताः । अपि ॥ तद्भक्ताः । तस्य नारायणस्य भक्ताः ॥ प्रभवोऽपि । प्रतीकारे समर्था अपि ॥ अस्य । तिरस्कारादिकर्तुर्लोकस्य । तिरस्कारादिकं निमित्तीकृत्य ॥ न प्रतिकुर्वंति । प्रतीकारं न कुर्वंति । इत्येत् ॥ हि । प्रसिद्धं । मत्पुत्रस्तु परीक्षिद्राजकृताल्पतिरस्कारं निमित्तीकृत्य मरणापादकशापप्रदानरूपमहाप्रतीकारं कृतवान् । तत्तेनापि मत्पुत्रेणमरणापादकं महापापं कृतं संपादितं । तन्महापापं ॥ सर्वात्मा । सर्वस्वामी । भगवान्नारायणः क्षंतुमर्हतीति पूर्वेणान्वयः । एतेन तिरस्कृतेति श्लोकः पूर्वोत्तरश्लोकाभ्यामनन्वित इति दूषणं परास्तं । मत्पुत्रस्तु परीक्षिद्राजकृताल्पतिरस्कारं निमित्तीकृत्य मरणापादकशापप्रदानरूपमहाप्रतीकारं कृतवानिति वाक्यमध्याहृत्य तस्य वाक्यस्य पापं कृतं तद्भगवानिति पूर्वेणान्वय इत्यंगीकारात् । इत्येवं पूर्वोक्तिप्रकारेण महामुनिः स आंगिरसः पुत्रकृताघेनानुतप्तः सन् राज्ञा स्वयं साक्षात् ॥ विप्रकृतोऽपि । अवमानितोऽपि ॥ तत् । तस्य । राज्ञोऽघं नैवाचिंतयत् । कुत इत्यत आह ॥ साधव इति ॥ लोके । लोकानां मध्ये । ये साधवस्ते परैर्द्वंद्वेषु ॥ द्वंद्वैः । सुखदुःखादिद्वंद्वैः । योजिता अपि प्रायशः परान्न व्यथयंति । अंतर्णीतण्यर्थोऽयं । न व्यथयंति न हृष्यंति । अयमप्यंतर्णीतण्यर्थः । न हर्षयंति ॥ अयं । आंगिरसः । अपि साधुः । अतो नैवाघमचिंतयदिति पूर्वेणान्वयः । एतेन अयमांगिरसो राज्ञाऽघं कृतंनैवाचिंतयदित्याशंकायां साधवः परान्न व्यथयंति न हर्षयंतीत्युत्तरं वक्तव्यं । न व्यथंति न हृष्यंतीति कथनमनुपपन्नमिति दूषणं परास्तं । न व्यथंति न हृष्यंतीत्यनयोरंतर्णीतण्यर्थरूपार्थत्वांगीकारात् । साधवः परान्न व्यथयंति न हर्षयंतीत्यत्र किं निमित्तमित्यत आह ॥ यत इति । गुणाश्रय इत्यतः परं इति साधूनां निश्चय इति शेषः । आत्मागुणाश्रय इत्यत्र आत्मेत्यनंतरं अकारप्रश्लेषविशेषाभ्यां अगुणाश्रयः गुणाश्रय इति पदच्छेदः कर्तव्यः । आत्मा स्वयं अगुणाश्रयः दुःखापादकपापाश्रयः आत्मा स्वयं गुणाश्रयः सुखापादकगुण्याश्रयः । अस्मत्कृतपापपुण्ये एव दुःखसुखप्रदे । परे तु निमित्तमात्रामिति यावत् । इति निश्चयः साधूनां यतोऽतः परान्न व्यथयंति हर्षयंतीति । एतेन । आत्मागुणाश्रय इति निश्चयस्यैव परव्यथाघकरणेहेतुत्वात् । यत आत्मागुणाश्रयः । अतो न व्यथयंति न हर्षयंतीत्यनुपपन्नामिति परास्तं । गुणाश्रय इत्यतः परं इति साधूनां निश्चय इति शेषस्यांगीकृतत्वात् । एतदेवाभिप्रेत्याचार्यैः स्वकृतो गुणः स्वस्यैव यत इत्युक्तं । स्वकृतो गुण इत्यत्र स्वकृत इत्यनंतरं अकारप्रश्लेषविशेषाभ्यां अगुण इति गुण इति च पदच्छेदः । स्वस्यैवेत्यतः परं दुःखप्रदः सुखप्रद इति साधूनां निश्चय इति शेषः । स्वस्यैवेत्येवकारस्य स्वकृतो गुण इत्यनेन संबंधः । ततश्चेयं योजना । स्वकृतोऽगुण एव पापमेव स्वस्य दुःखप्रदः स्वकृतो गुण एवमेव स्वस्य सुखप्रद इति साधूनां

निश्चयो यत इति ॥ ४८–४९–५० ॥ इति श्रीभागवतटिपण्यामेष्टादशोऽध्यायः ॥ १–१८ ॥ ॥ ॥

॥ हरिः ॐ ॥ अर्घ्यगृहीतपाणिरित्यस्य अर्घ्यार्थं गृहीतपाणिरिव विज्ञापनार्थं गृहीतपाणिरित्यर्थः । एतेन विज्ञापनार्थं गृहीतपाणिरिति वक्तव्येऽर्घ्यार्थं गृहीतपाणिरित्यनुपपन्नमिति दूषणं परास्तं ॥१२॥ ॥ गर्ह्यकर्म । निंद्यकर्म । राज्ञां कुलं ॥ ब्राह्मणपादशौचं । अत्र प्रथमा पंचम्यर्थे । ब्राह्मणपादशौचात् । ब्राह्मणपादशौचस्थात्मात् ॥ आरात् । दूरे ॥ विसृष्टं । त्यक्तमित्यर्थः ॥ १३ ॥ इति श्रीभागवतटिप्पण्यामेकोनविंशोऽध्यायः ॥ १–१९ ॥

॥ हरिः ॐ ॥ अपि अपि च भगवान्कृष्णो मे प्रीतो भगवद्दर्शनादिकमुत्पाद्य प्रीतिकार्यं प्रदर्शितवान् । ननु कृष्णस्य प्रीतिस्त्वय्यस्ति चेत्तर्ह्यस्मद्दर्शनादिकं कृष्णप्रीतिफलं स्यात् । कृष्णप्रीतिरेव कुत इत्यत आह ॥ पांडुसुतेति ॥ पांडुसुतप्रियः । पांडुसुताऽयुधिष्ठिरादयः प्रिया यस्य स पांडुसुतप्रियः । कृष्णः ॥ तद्गोत्रस्य । पांडुसुतगोत्रस्य । मे ॥ पैतृष्वसेयप्रीत्यर्थं । पितुर्वसुदेवस्य कुंती तस्याः पुत्राः पैतृष्वसेया युधिष्ठिरादयस्तेषां प्रीत्यर्थं । आप्तबांधवो जात इति मम प्रीत एव । अतो भवतां दर्शनं कृष्णप्रीतिफलमिति युक्तमेव । एतेन शुकाचार्यप्रशंसावेलायां पांडवनिमित्तकृष्णप्रीतिकथनमसंगतमिति दूषणं परास्तं । पांडवनिमित्तकृष्णप्रीतेः शुकाचार्यदर्शनं फलमिति कथनेन शुकाचार्यप्रशंसाया लाभात् ॥ ११ ॥ इति श्रीभागवतटिप्पण्यां विंशोऽध्यायः ॥ १–२० ॥ ॥ इति श्रीमदश्रुतपदवाक्यप्रमाणव्याख्यातॄणामभिनवचंद्रिकाऽभिनवतांडवाभिनवगदाऽभिनवामृतादिबहुग्रंथकर्तॄणां जगत्पूज्यपादुकानां श्रीसत्यनाथतीर्थश्रीपादानां शिष्येण सत्याभिनवयतिना त्वया भागवतटिप्पणीं कारयिष्यामीति तदीयामोघसंकल्पमात्रमवलंब्य कृतायां श्रीमद्भागवतटिप्पण्यां दुर्घटभावदीपिकायां प्रथमः स्कंधः समाप्तः ॥ १ ॥ ॥ ॥ ॥ ग्रंथसंख्या ॥ ५०० ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ ॥ ॥

॥ ७ ॥

॥ हरिः ॐ ॥ ॥ श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥ यदा यस्मात्कारणात् । विनष्टदृष्टिः विनष्टभगवज्ज्ञानः । राजा धृतराष्ट्रः । असाधून् स्वसुतान्दुर्योधनादीन् । अधर्मेण । तु शब्द एवार्थे । अधर्मेणैव । पुष्णन्सन् ।

बंधून् रहितान्यविष्ठस्य भ्रातुः पांडोः सुतान्धर्मादीन् लाक्षाभवने प्रवेश्य । ददाह दाहप्रयत्नं कृतवान् । तस्मात्कारणाद्विदुरोऽयात् । यदा यस्मात्कारणान्नृपो धृतराष्ट्रः सभायामस्रैर्नेत्रजलैः कुचकुंकुमानि हरंत्याः कुरुदेवदेव्याः कुरुदेवस्य भीमस्य देव्या अत एव स्नुषाया द्रौपद्याः केशाभिमर्शं केशस्पर्शात्मकं गर्ह्यं सुतकर्म न वारयामास । तस्मात्कारणाच्चायादिति । एतेन पांडवदाहादि काले विदुरस्य तीर्थयात्रार्थं गमनस्याभावात् । यदा ददाहतदा विदुरोऽयादित्यादि कथनमनुपपन्नमिति दूषणं परास्तं । यदेति शब्दानां कालार्थकत्वमनंगीकृत्य हेत्वर्थकत्वमंगीकारात् । एतेनैव पांडवानां दाहाभावात् । पांडवान्ददाहेति कथनमिति दूषणमपास्तं । ददाहेत्यस्य दाहप्रयत्नं कृतवानित्यर्थ इत्यंगीकारात् । एतेनैव ददाहेत्यादिकमनन्वितमिति दूषणं पराकृतं । यदा ददाहेत्यादेः परं प्रत्येकं तस्मादिति शेषमंगीकृत्य गतव्यथोऽपादुरुमानयान इति वक्ष्यमाणेनान्वय इत्यंगीकारात् । ननु धृतराष्ट्रः पांडवान्ददाहेत्यनुपपन्नं । दुर्योधनादीनामेव पांडवदाहप्रयत्नकर्तव्यत्वेन धृतराष्ट्रस्य पांडवदाहप्रयत्नकर्तृत्वाभावादिति चेन्न । पांडवदाहप्रयत्नकर्तृदुर्योधनादि स्वामित्वाभिप्रायेण धृतराष्ट्रः पांडवान्ददाहेत्युक्तत्वात् । तर्हि द्रौपदीकेशावमर्शनं कर्तुःदुःशासनस्वामित्वाभिप्रायेण धृतराष्ट्रो द्रौपदीकेशाभिमर्शनं कृतवानित्यपि वक्तव्यमिति न वाच्यं । धृतराष्ट्रः पांडवान्ददाहेत्युक्त्वा केशाभिमर्शनं कृतवानित्युक्तेरपि समानन्यायतयाऽर्थात्प्राप्तत्वेन केशाभिमर्शनं कृतवानित्युक्तेरभावस्यादोषत्वात् ॥ ता० अर्थः ॥ यदा ददाहेत्युक्तं तदा केशाभिमर्शः केशाभिमर्शोक्तिरपि प्राप्तःप्राप्तेति हेतोर्धृतराष्ट्रः केशाभिमर्शनं कृतवानित्युक्त्यभावो न दोषाय । एतेन यदा ददाह तदा केशाभिमर्शः प्राप्त इत्येतदसंगतमनुपपन्नं चेति दूषणं परास्तं । यदा ददाह तदा केशाभिमर्शः प्राप्त इत्यस्य यदा ददाहेत्यतः परमित्युक्तमित्यस्य शेषमंगीकृत्य केशाभिमर्शन शब्दस्य केशाभिमर्शोक्तिलक्षकत्वं चांगीकृत्य प्राप्त इतीत्यतः परं केशाभिमर्शनं कृतवानित्युक्त्यभावो न दोषायेति शेषं चांगीकृत्य यदा ददाहेत्युक्तं तदा केशाभिमर्शोक्तिरपि प्राप्तेति हेतोः केशाभिमर्शनं कृतवानित्युक्त्या न दोषायेत्यर्थ इत्यंगीकारात् । यदेति शब्दानां कालार्थकत्वभ्रांतिं वारयति ॥ हेत्वर्थ इति । यदा शब्द इत्येकवचनं जातौ । यदा शब्दो यदा तु राजेत्यादि श्लोकस्था यदा शब्दा हेत्वर्थे वर्तंते । यदा शब्दस्य हेत्वर्थकत्वेऽभिधानं दर्शयाति ॥ यदेति । अपि च शब्दौ परस्परसमुच्चयौ इति ॥ ६–७ ॥ धनुर्द्वारि निधायेत्यस्य संहारार्थं धनुर्गृहित्वा तद्गृहप्राप्यांतर्द्वारनिरोधकैः शत्रुभिरंतर्गृहे स्थितास्तच्छत्रव इव पांडवैर्दुर्योधनादयो हता भविष्यंतीति सूचनार्थं धनुरंतर्द्वारि निधायेत्यर्थः । तेन द्वारि धनुस्थापनं व्यर्थमिति चोद्यस्यानवकाशः ॥ १६ ॥ नृपासनाधिं परिहृत्येत्यस्य नृपासनविषयमानसव्यथां परिहृत्येत्यर्थः नृपासनविषयं मनो वर्तत इति भ्रमं परिहृत्येति चार्थः । आचार्यैराधि शब्दस्य मनोव्यथावाचित्वस्य पुंस्याधिर्मानसी व्यथेति लोकप्रसिद्धामर-

सिद्धत्वात् । नृपासनाधिं परिहृत्येत्यस्योग्रसेनस्य नृपासनविषयमानसंव्यथां परिहृत्येत्यर्थस्य शिष्यैरेव ज्ञातुं शक्यत्वात् । तमर्थमनुक्त्वा मनोवाचकस्याधिशब्दस्य मनो वर्तत इति भ्रमलक्षत्वमंगीकृत्य नृपासनाधिं परिहृत्येत्यस्य कृष्णस्य नृपासनविषयकं मनो वर्तत इति श्लोके भ्रमं परिहृत्येत्यर्थांतरं मनसि निधायाधि शब्दस्य मनोवाचित्वे आदिर्मनोरूपं चात्मा स्वमिति चोच्यत इत्यभिधानमिति प्रमाणमुक्तमिति ॥ २९ ॥ अहिवत् सर्पवत् । अत्यमर्षी भीमः । कृताघेषु दुर्योधनादिभिर्मिलित्वा कृतापराधेषु इदानीं विद्यमानेषु दीर्घतममघं । अघ शब्देन पुनः शिक्षाकर्तव्येति बुद्धिर्गृह्यते । अघं पुनः शिक्षा कर्तव्येति बुद्धिं व्यमुंचदित्यनेन क्षेमप्रश्नलाभार्थमुक्त्वाऽऽस्त इत्यर्थो ग्राह्यः । व्यमुंचत् मुक्त्वा आस्ते किंत्वेत्यर्थः । एतेनाघमित्यनेन किं स्वकृताघस्य ग्रहणं किं वा परकृताघस्य ग्रहणं । नाद्यः । स्वस्मिन्नघस्यैवाभावेनाघत्यागायोगात् । न द्वितीयः । परकृताघत्यागं प्रतिभीमस्य कर्तृत्वायोगादिति चोद्यस्यानवकाशः ॥ ३७ ॥ इति श्रीभागवतटिप्पण्यां प्रथमोऽध्यायः ॥ १-१ ॥ ॥

॥ हरिः ॐ ॥ एषां नृपाणां श्रियो जिहीर्षया भगवता प्रेरणायां कृतायां । भीष्मकेणेति शेषः भगवता प्रेरणायां कृतायां भिष्मकेण भीष्मककन्यया । सुपां सुपो भवंतीति वचनादियं तृतीया चतुर्थ्यादेशः सा चतुर्थी तादर्थ्ये । भीष्मककन्यया भीष्मककन्यायै भीष्मककन्यार्थं । सवर्णेनेति भावप्रधानोऽयं निर्देशः । सवर्णत्वेन क्षत्रियत्वमात्रयोग्यतया ये नृपा आहुतास्तेषां नृपाणां मूर्ध्नि । सुपर्णः सुष्ठु परो णः आनंदो यस्यासौ सुपर्णः कृष्णः परं ददत्सन् मिषतां पश्यतां नृपाणां पुरतो गांधर्ववृत्त्या स्वभागं स्वभागभूतां रुक्मिणीं जिह्रे इति ॥ ता० अर्थः ॥ भीष्मककन्ययेति तृतीया चतुर्थ्यादेशः । सा चतुर्थी तादर्थ्यं इत्यंगीकृत्य भीष्मककन्ययेत्यर्थमाह ॥ भीष्मकन्ययाअर्थ इति । सवर्णेनेति सवर्ण शब्दो भावप्रधान इत्यभिप्रेत्य सवर्णेनेत्यस्यार्थमन्वयं च दर्शयति ॥ सवार्णेति सवर्णमात्रं क्षत्रियत्वेन विवक्षितं । एषां श्रियो जिहीर्षयेत्यतः परं भगवता प्रेरणायां कृतायां भीष्मकेणेत्यस्य शेषमंगीकृत्या हृता इत्यनेनान्वयं चांगीकृत्य तात्पर्यार्थमाह ॥ एषामिति । एषां नृपाणां श्रियो जिहीर्षया भगवता भीष्मकस्याव्हानबुद्धिर्भगवता कृतेत्यस्य व्याख्येयं नास्तीति दूषणं निरस्तं । सुपर्ण इत्यस्य सु परानंद इत्यर्थमभिप्रेत्यास्मिन्नर्थे प्रमाणमाह ॥ सुपर्ण इतीति ॥ ३ ॥ सविधिमित्यत्र सोरमादेशः छांदसः । एतेन सविधिमित्यस्य विधिनासहितं यथा भवति तथा जग्रह इति क्रियाविशेषणत्वात् क्रियाविशेषणस्य नपुंसकत्वात् स्वमोर्नपुंसकत्वादिति सोर्लुकि सविधीति स्यात् । न तु सविधिमिति । अतःसविधिमिति कथनमनुपपन्नमिति दूषणं निरस्तं ॥८॥
क्षणदयादत्तक्षणस्त्रीक्षणसौहृद इत्यस्य क्षणदया क्षणदायां रात्रौ दत्तं क्षणः स्त्रीभ्यो दत्तोऽवकाशो येन स तथा स्त्रीक्षणसौहृदः । ईक्षणमि-

स्युपलक्षणं । संभाषणादिकं च ग्राह्यं । स्त्रीणां दर्शनसंभाषणादिकं स्त्रीषु सौहृदं च यस्य स तथेत्यर्थः । एतेन क्षणदायां दत्तक्षण इति वक्तव्ये क्षणदया दत्तक्षण इत्युनुपपन्नमिति चोद्यं परास्तं । क्षणदेति तृतीया सप्तम्यादेश इत्यभ्युपगमात् । एतेनैव मुक्तियोग्यस्त्रीषु सर्वदा सौहृदस्य वक्तव्यत्वात् स्त्रीक्षणसौहृद इत्यनुपपन्नमिति दूषणं निरस्तं । स्त्रीक्षणसौहृद इत्यस्य स्त्रीषु क्षणपर्यंतं सौहृदं यस्य स तथेत्यर्थ इत्यनभ्युपगमात् ॥ २१ ॥ इति श्रीभागवतटिप्पण्यां तृतीयोऽध्यायः ॥ ३-२ ॥ ॥

॥ हरिः ॐ ॥ वसो इत्यस्य देवेत्यर्थः । वसोरिंद्रं वसुपतिमिति प्रयोगात् । आचार्यैर्ऋग्भाष्ये वसोरिंद्रं वसुपतिमिति वसु शब्दयोर्वसूनां च पतिं देवदेवेश्वरं प्रभुमिति देवतावाचकत्वं चोक्तत्वात् । टीकाकारैश्च वसु शब्दो देवपर्यायः । जातावेकवचनं । वसूनां ये वसवस्तेषां पतिं देवदेवेश्वरमित्युक्तत्वात् । एतेनोद्धवस्य वसुत्वाभावात्प्रयोजनाभावाच्च वसो इति कथनमनुपपन्नमिति दूषणमपहास्तितं । वसुशब्देन देवताकर्तृके यागे कथं ममाधिकार इत्युद्धवहार्दशंका परिहारार्थं देवत्वमुच्यत इति स्वीकरणात् ॥११॥ स एष साधो चरमो भवानामित्येतत् साधो उद्धव स ज्ञानादि गुणवत्तया प्रसिद्धः । एष त्वं भवानां प्राणिसंसारक्लेशानां चरमस्तत्त्वोपदेशेन चरमत्वं संपादको निवर्तक इति यावदिति व्याख्येयं । एतेन पुनः कृष्णावतारवेलायां उद्धवस्य पुनरुत्पत्तेर्वक्तव्यत्वादेष भव एष उत्पत्तिर्भवानां उत्पत्तीनां चरमः चरमेति कथनमनुपपन्नमिति दूषणं परास्तं । भवानामित्यनेन संसारक्लेशान्गृहीत्वा तत्त्वोपदेशेनेति शेषमंगीकृत्यायं चरम शब्दो भावप्रधानश्चरमशब्दात्प्रातिपदिकाद्धात्वर्थ इति करोत्यर्थे णिचि पचाद्यचि चरम शब्दनिष्पन्नत्वाच्चेत्यंगीकृत्यैष भवानां चरम इत्यस्यैषत्वं प्राणिसंसारक्लेशानां चरमत्वसंपादक इत्यर्थ इत्युक्तत्वात् ॥ १२ ॥ नोद्धवोऽण्वपि मन्न्यून इत्यनेनोद्धवस्य भगवता सर्वं साम्यं कथमुक्तं । किंचित्साम्यमेव वक्तव्यमित्याशंका उत्तमैराधिकत्वं वा साम्यं वा विजयोऽपि वेत्यादि प्रमाणेन परिहृता । तस्यार्थः । नीचानां किंचित्समामुत्तमैरधिकत्वं च । साम्यं सर्वसाम्यं वा विजयोऽपि वा क्वचित्प्रमाणेषूच्यते । तदधिकत्वादिकं । अविद्यमानमिति शेषः । कथं तर्हि प्रमाणवाक्यैरुक्तमित्याशयेन पृच्छति ॥ अपि त्विति । उत्तरमाह ॥ मोहार्थमिति । मोहार्थं वा मूढ हृष्यन् सुरार्थं स्तुत्यर्थं । सतोऽपीति शेषः । स्तुत्यर्थं सतोऽपि किंचित्साम्येन किंचित्साम्यस्योपेक्षया अविवक्षया सतोऽप्यविवक्षया । अनूदरकन्येत्यादौ दर्शनात् । उपलक्षणमेतत् । असतोऽप्याधिक्यादेर्विवक्षया किंचित्समानाधिक्यादिकं क्वचित्प्रमाणवाक्येषूच्यत इति । सतोऽप्यविवक्षाऽसतोऽप्यविवक्षेत्येतत् महाभाष्ये चोक्तं षष्ठी शेष इति सूत्रे । एवं तर्हि कर्मादीनामविवक्षाशेषः कथं पुनः सतो नामा

विवक्षा स्यात् । सतोऽप्यविवक्षा भवति । तद्यथा । अलोमिका एडिका । अनुदाराकन्येति । असतश्चाविवक्षा भवति । तद्यथा । समुद्रः कुंडिकाविद्यो वर्धितकमितीति ॥ ३१ ॥ इति श्रीभागवतटिप्पण्यां चतुर्थोऽध्यायः ॥ ३--४ ॥ ॥

॥ हरिः ॐ ॥ ॥ मुनिस्ते सखा कृष्णो वेदव्यासो भगवद्गुणानां भगवतो हरेर्गुणानां विवक्षुः सन् तद्भारतमाह । अपिशब्दो भारते । हरिर्गुणाश्चोक्ता इत्यनुक्तसमुच्चये । नृणामिति नृ शब्दो ज्ञानिपरः । नृणां भारततात्पर्यज्ञानिनां मतिर्यस्मिन्भारते कथायामित्येतत् । अर्थवशात्तृतीयार्थं च संबध्यते । हरेः कथायां सत्यामपि हरेः कथया न गृहीता । हरिकथाविषयिणी न जातेति यावत् । किंतु ग्राम्यसुखानुवादैर्मतिर्गृहीतेति । नृणां भारततात्पर्यज्ञानिनां मतिर्यस्मिन्भारते ग्राम्यसुखानुवादैरित्येतत् । अर्थवशात्सप्तम्यंतं च संबध्यते । ग्राम्यसुखानुवादेषु सत्स्वपि ग्राम्यसुखानुवादैर्न गृहीता ग्राम्यसुखानुवादविषयिणी न जातेति यावत् । किंतु कथायामिति सप्तमी तृतीयादेशः । हरेः कथायां हरेः कथया गृहीतेति वाऽर्थः ॥ ता० अर्थः ॥ अत्राद्येऽर्थे भारततात्पर्यज्ञानिनामिति शेषः । हरेरित्यस्यावृत्तिः । कथायामित्येतदर्थवशात्तृतीयार्थं च संबध्यते । गृहीतेत्यस्यावृत्तिः । द्वितीयेऽर्थे भारततात्पर्यज्ञानिनामिति शेषः । कथायामिति सप्तमी तृतीयादेशः । ग्राम्यसुखानुवादैरित्येतत् अर्थवशात्सप्तम्यंतं च संबध्यते । गृहीतेत्यस्य चावृत्तिः । ततश्चानेन भारततात्पर्यज्ञानिनां मतिर्यस्मिन्भारते हरेः कथायां सत्यामपि हरेः कथया न गृहीता । किंतु ग्राम्यसुखानुवादैर्गृहीतेत्याद्यर्थो भारततात्पर्यज्ञानिनां मतिर्यस्मिन्भारते ग्राम्यसुखानुवादैर्ग्राम्यसुखानुवादेषु सत्स्वपि ग्राम्यसुखानुवादैर्न गृहीता । किंतु हरेः कथया गृहीतेति द्वितीयार्थश्चोक्तो भवति । एतेन यस्मिन्नृणामिति भागवतेन यस्मिन्भारत इति तात्पर्येण च भारतेन किं हरिकथायां मतिर्न भवतीत्युच्यते । किंवा भवतीत्युच्यते । नाद्यः । भारतान्नाधिकं विष्णोर्महिमावाचकं क्वचित् । भारतान्न विरागाय भारतान्न विमुक्तये इत्यादि प्रमाणविरोधात् । न द्वितीयः । भारतस्यानुपादेयत्वप्रसंगादिति शंकाऽपास्ता । ज्ञान्यज्ञानिविवक्षया भागवतेन तात्पर्येण चार्थद्वयमप्युचितमित्यस्यार्थस्योपपादितत्वात् । भारतान्नाधिकमित्यादिना प्राप्त इत्यनेनाचार्यैर्भारते हरिकथाऽस्तीति प्रमाणमाह ॥ १२ ॥ इति श्रीभागवताटिप्पण्यां पंचमोऽध्यायः ॥ ३--५ ॥ ॥ ॥ ॥

॥ हरिः ॐ ॥ ॥ **तवांघ्रिछायांशविद्यामित्यस्य** त्वत्स्वरूपविषयकत्वकर्तृकप्रतिबिंबांशभूतज्ञानमित्यर्थः । एतेन विद्याशब्देन किं वेदादि विद्याग्रहणं किंवा ज्ञानग्रहणं । आद्ये चतुर्मुखस्य । किं सर्वविद्याश्रयत्वमंगीक्रियते किंवांऽशविद्याश्रयत्वं । नाद्यः । प्रधानांशश्चतुर्मुख इत्यादि प्रमाणविरोधात् । न द्वितीयः । चतुर्मुखस्य वेदादि सर्वविद्याश्रयत्वात् । द्वितीये किं महालक्ष्म्याः सर्वविद्याश्रयत्वमंगीक्रियते किंऽवांशविद्याश्रयत्वं । नाद्यः । ईश्वरादन्यत्रेश्वरविषयकसर्वज्ञानाश्रयत्वस्य बाधितत्वात् । न द्वितीयः । सर्वविद्याश्रया प्रोक्ता इत्यादि प्रमाणविरोधात् । पक्षद्वयेऽपि तवांघ्र्यंशविद्यामित्यनेन पूर्णत्वात् । छायाशब्दो व्यर्थ इति दूषणमपास्तं । तवांघ्रि शब्दस्य भगवत्स्वरूपविषयकं भगवत्कर्तृकज्ञानपरत्वमंगीकृत्य छाया शब्दस्य प्रतिबिंबार्थत्वमंगीकृत्य तवांघ्रिछायांशविद्यामित्यस्य भगवत्स्वरूपविषयकभगवत्कर्तृकज्ञानानां बिंबभूतानि यानि ज्ञानानि तदंशज्ञानमित्यर्थस्योक्तत्वात् ॥ ता० अर्थः ॥ ब्रह्मविद्येति । ब्रह्म शब्देन ब्रह्मविषयकं ब्रह्मकर्तृकं ज्ञानं गृह्यते । विद्या शब्देन प्रतिबिंबज्ञानं । ब्रह्मविद्या । ब्रह्मविषयक ब्रह्मकर्तृकप्रतिबिंबज्ञानं हरेः छायेत्युच्यते । तदंशो ब्रह्मज्ञानप्रतिबिंबज्ञानांशः सुरेष्वपि । किमु मनुष्यादिष्वित्येतद्धि प्रसिद्धं । श्रियो महालक्ष्म्याः सर्वविद्या भगवत्ज्ञानप्रतिबिंबसर्वज्ञानानि प्रमाणैः प्रोक्ताः प्रोक्तानि प्रतिपादितानि । चतुर्मुखः प्रधानांशः प्रधानो देवाद्यपेक्षयाऽधिकोऽशो भगवत्ज्ञानप्रतिबिंबांशो यस्य स प्रधानांश इति प्रमाणैः प्रतिपादित इति ॥ १८ ॥ इति श्रीभगवतटिप्पण्यां षष्ठोऽध्यायः ॥ ३–६ ॥ ॥ ॥

॥ हरिः ॐ ॥ ॥ हे कुरूद्वह पुरुषस्य ब्रह्मांतर्यामिणः परमपुरुषस्य यत्र मुखे । वर्णानामित्येतदर्थवशाद्वर्णा इति प्रथमाबहुवचनांतं संबध्यते । वर्णाः । उन्मुखा इति शेषः ॥ तस्मान्मुखतः ब्रह्म ब्राह्मणोऽवर्तत उत्पन्नः । उभयोर्भगवन्मुखत्वे नियामकमाह ॥ **उन्मुखत्वादिति** । ब्राह्मण इत्येतदर्थवशाद्ब्राह्मणस्येति षष्ठ्यंतं संबध्यते । ब्राह्मणः ब्राह्मणस्य वर्णानां चोन्मुखत्वात् । भगवन्मुखोन्मुखत्वादेव ब्राह्मणो वर्णानां मुख्यो गुरूपदेष्टाऽभूदिति । अत्र वर्णानामुन्मुखत्वं नामाभिव्यक्तत्वं ब्राह्मणस्योन्मुखत्वं नामोत्पन्नत्वमिति विवेको द्रष्टव्यः ॥ ३० ॥ **भगवतो मायामित्यस्य** भगवतो नारायणस्य मायां गुणमहत्त्वमित्यर्थः ॥ ता० अर्थः ॥ भगवतो मायामयमित्यनुवादः । भगवन्महिमानमिति व्याख्यानं । भगवन्महिमानमित्यत्र गुणेति योग्यतया संबध्यते । अनेन भगवतो मायामयमित्येतद्भगवद्गुणमहत्त्वमिति व्याख्यातं भवति । माया शब्दस्य गुणमहत्त्वार्थकत्वं प्रमाणेनोपपादयति ॥ **मायेति** । प्राचुर्ये तु महत्त्वरूपप्राचुर्यार्थेऽपि मयट्र प्रत्ययः । अतो मायेति शब्देन महिमा तु गुणतो महत्त्वमपि प्रोक्ताः प्रोक्तामिति । एतेन प्रकृतिं विना मयट् प्रत्ययायोगात् । मायेति शब्दस्य प्राचुर्यार्थकमयट् प्रत्ययरूपत्वं स्वीकृत्य मायेति शब्दस्य महत्त्वव्याख्यानमयुक्तमिति चोद्यं निरस्तं । गुण शब्दात्प्राचुर्यार्थे मयट् प्रत्यये छांदसे दीर्घे टापि छांदसे गुण शब्दलोपे च मायेति रूपं निष्पन्नमित्यभ्युपगम्य मायेति शब्दस्य गुणतो महत्त्वमिति व्याख्यानात् । एतेनैव ब्राह्मणप्रचुरग्राम इत्यादौ प्राचुर्यार्थकप्रचुरशब्देन ब्राह्मणविरोधिशूद्राणामल्पत्वस्य प्रतीतिर्मायेति

शब्दस्य गुणप्राचुर्यार्थकत्वस्य स्वीकारे गुणाविरोधि दोषाणामल्पत्वं प्रतीयेतेति दूषणं निरस्तं । मायेति शब्दस्य गुणतो महत्त्वरूपप्राचुर्यार्थ इत्यभ्युपगमात् ॥ ३९ ॥ इति श्रीभागवतटिप्पण्यां सप्तमोऽध्यायः ॥ ३--७ ॥ ॥ ॥

॥ हरिः ॐ ॥ ॥ स्वत इत्यस्य स्वातंत्र्यादित्यर्थः । एतेन देशकालादिनैव स्वतो ज्ञानलोपस्य क्वाप्यदृष्टत्वात् । परमेश्वरस्य ज्ञानलोपो नास्तीति कथनमनुपपन्नमिति शंका निरस्ता । स्व शद्बस्य स्वतंत्रमित्यभ्युपेत्य भावप्रधानं चाश्रित्य स्वत इत्यनेन परमेश्वरस्य देशादिना ज्ञानलोपो नास्तीत्यत्र देशकालादि स्वातंत्र्यरूपहेतुरुच्यत इत्यभ्युपगमात् ॥ ५ ॥ हे भगवन् विभो यद्यपि तव सूत्रासिना मह्यं मम संशयो द्विकोटिकसंशयः संछिन्नोऽपि तथापि उभयत्र कोटिद्वये प्रत्येकं मे मनः संप्रधावति एककोटिकसंशयद्वयं भवति । एतेन संछिन्नः संशय इति संशयो नास्तीति उक्त्वोभयत्र मनो धावतीति संशयोऽस्तीति कथनं व्याहतमिति दूषणं निरस्तं । उभयत्र मनो धावतीत्यस्य प्रत्येकमिति शेषपूरणेनैककोटिकसंशयद्वयमस्तीत्ति तात्पर्यार्थस्योक्तत्वात् ॥ २५ ॥ रतिरास इत्यस्य रतिसार इत्यर्थः। एतेन साररूपार्थलाभार्थं रतिरस इति वक्तव्ये रासक्रीडावाचिरास शद्बप्रयोगोऽनुपपन्नमिति दूषणं परास्तं । रस शब्दः छांदसे दीर्घे कृतेरास इति निष्पन्न इत्यंगीकृत्य इति सार इत्यर्थस्योक्तत्वात् ॥ १९ ॥ इति श्रीभागवतटिप्पण्यामष्टमोऽध्यायः ॥ ३--८ ॥ ॥

॥ हरिः ॐ ॥ ॥ लोकत्रयसंग्रहेणायमतो विस्तरतः समानदेहेन हरितोपलाद्रेः प्रेक्षां दर्शनीयकांतिं क्षिपंतं । विचित्रदिव्याभरणांशुकानां कृतश्रियोपाश्रितदिव्यवेषमित्यनुपपन्नं । भगवत आभरणानिमित्तकदिव्यवेषत्वस्य प्रमाणबाधितत्वात् । कृत्येतद्ध्यर्थं । समानदेहेनेत्येतदनन्वितमिति दूषणानि निरस्तानि । समानदेहेनेत्यस्य हरितोपलाद्रेः प्रेक्षां क्षिपंतामिति पूर्वेणान्वयमंगीकृत्य आभरणादीनां भगवन्निमित्तकदिव्यवेषत्वमात्रोच्यत इत्यभ्युपगमात् ॥ २५ ॥ इति श्रीभागवतटिप्पण्यां नवमोऽध्यायः ॥ ३--९ ॥ ॥

॥ हरिः ॐ ॥ ॥ अथेयं योजना । अत्रापीत्याद्यपेक्षितपदानां शेषः । यदपि यद्यपि त्वं सर्वः । उरुः उत्कृष्टः । भेदरहित इति यावत् । तथाऽपि मायागुणव्यतिकरात् मायागुणानां प्रकृतिकार्याणां व्यतिकरात् व्यत्यासात् । नानात्वादिति यावत् । तदवस्थानेन विभावसि विविधतया । नानात्वेनेति यावत् । भासीति ॥ अयं भावः । सर्वत्र विद्यमानस्य भगवत उत्कृष्टत्वेन विरुद्धधर्माधिकरणत्वाभावात् । भेदाभावेऽपि प्रकृतिकार्याणां भिन्नत्वेन तत्संबंधादविद्यमानो देहः परमेश्वरे प्रतीयत इति । नान्यादित्यनेनेश्वरस्य सर्वनियामकत्वं रूपं माहात्म्यमुक्तं । मायागुणव्यतिकरादित्यनेन सर्वत्र विद्यमानस्य भगवतोऽभिन्नत्वरूपं माहात्म्यमुच्यते । तेन पादद्वयं परस्परमसंगतमिति दूषणस्यानवकाशः । आचार्यैर्मायागुणव्यतिकरादिति पदस्य यच्च स्वनानात्वं तदपि स्थानभेदादसदेव भातीत्यनेन तात्पर्यार्थ

उक्तः । तेन स्वनानात्वमित्यादि पदानां व्याख्येयं नास्तीति चोद्यानवकाशः । योजना त्वस्मदुक्तैव ॥ १ ॥ ज्ञातोऽसीत्यत्र यस्माद्देहभाजा मया ज्ञातोऽसि तस्माद्देहभाजां भगवतो गतिर्न ज्ञायत इति मतं दुष्टमित्युक्तं । तदनुपपन्नं । यत्ज्ञातरूपं ज्ञातोऽन्यस्यैव भगवत्त्वादित्याशंकाऽत्र परिन्ह्रियते । हे परम यन्नाभिपद्मभवनात् यस्य रूपस्य नाभिपद्माख्यस्य भवनात् । अहमाविरासं । अवबोधरसोदयेन सर्वविषयकज्ञानश्रेष्ठापरोक्षज्ञानोदयेन शश्वन्निवृत्ततमसः सर्वदानिवृत्ताज्ञानस्य भगवतः स्वरूपं सदनुग्रहाय सतामनुग्रहायादौ गृहीतं व्यक्तीकृतं । अवतारशतैकबीजं अनंतावताराणामभिन्नं बीजं आनंदमात्रं अविकारं अविद्धवर्चः विश्वसृज एकं स्वगुणादिभिरेकं अविश्वं विश्वाभिन्नं आद्यं भूतेंद्रियात्मकं भूतेंद्रियनियामकमेतत्प्रमाणप्रसिद्धं । यद्रूपं पश्यामि अदः प्रत्यक्षप्रसिद्धं । ते यद्रूपमुपाश्रितोऽस्मि । अतो रूपात्परमुत्तमं नास्ति । अतो मत्ज्ञातरूपस्य भगवत्त्वात् । भगवतो गतिर्नज्ञायत इति मतमवद्यामिति यदुक्तं तदुपपन्नमिति ॥ ता० अर्थः ॥ पदानां व्यवहितत्वात् । यन्नाभिपद्मभवनादहमाविरासमित्यारभ्यातः परं नास्तीत्यंतेनान्वयं प्रदर्श्य तस्य चातो न ज्ञायत इत्यवद्यामिति पूर्वेणान्वयं प्रदर्शितं । आनंदमात्रमित्युक्तं सर्वविशेषणानामुपलक्षणं । ननु दैत्यादिभिः सर्वथा भगवतो ज्ञातत्वात् । भगवान्न ज्ञायत इति मतमवद्यमित्युक्तमित्यत आह ॥ अत्युत्तमेति । अत्युत्तमेत्यनेन तमोयोग्यजीवानां मिश्रजीवानां च व्यावृत्तिः ॥ अयं भावः ॥ तमोयोग्यैरधमजीवैर्मिश्रगतिः योग्यैर्मध्यमजीवैर्भगवतो गतिर्न ज्ञायत इति मतं समीचीनं । मुक्तियोग्यैर्मध्यमापेक्षयोत्तमैरधमापेक्षयाऽत्युत्तमैर्जीवैर्भगवतो गतिर्न ज्ञायत इति मतं दुष्टमिति । आदौ गृहीतमित्यनेनाव्यक्तस्य व्यक्तिरुच्यत इति भ्रमं वारयति ॥ अनादिगृहीतमेवेति । अचिंत्य शक्त्येति शेषः । गृह्यत इत्यस्यावृत्तिः । आदिकाले व्यक्तमेवाचिंत्यशक्त्याऽऽदिकाले गृह्यते । व्यज्यते । न त्वव्यक्तं व्यज्यते । प्रमाणसंमत्योक्तं स्थापयति ॥ यत्तदिति । अनादिनित्यत्वाद्व्यक्तेति शेषः । व्यक्त्याऽनादिनित्यात् । सर्वदाव्यक्तादिति यावत् । अव्यक्तादन्येषामव्यक्तात् । तस्मात्परमेश्वराच्चतुर्मुखो जज्ञे । अनेन परमेश्वरस्य नित्यव्यक्तत्वेऽव्यक्तत्वोक्तेः का गतिरिति दूषणं परास्तं । भगवतोरूपं भगवतो नित्यव्यक्तमेव । अन्येषामव्यक्तामित्याभिप्रायात् । भूतेंद्रियात्मकमित्यनेन भूतेंद्रियमैक्यमुच्यत इति भ्रमं परिहराति ॥ भूतेंद्रियाणाति । अनेन भूतेंद्रियनियामकत्वात् । भूतेंद्रियात्मकमित्युच्यते । न त्वैक्यादित्युक्तं भवति । आत्म शब्दस्य नियामकत्वार्थे प्रमाणमाह ॥ यच्चेतीति ॥ ३--२ ॥ यावत्पृथक्त्वमिदमात्मन इंद्रियार्थमित्यादि श्लोकस्यार्थः । तत्रेंद्रियाणामित्यादि पदानां शेषः । हे ईश जनो यावत् यदा आत्मनो जीवस्य इंद्रियार्थं इंद्रियकरणकविषयभोगार्थं इंद्रियाणां मन आदींद्रियाणां यदिदं पृथक्त्वं ध्यानादि क्रियानुकूलपृथक्शक्तिविशिष्टत्वमस्तीति तत् भगवतो मायाबलं हरीच्छाधीनामिति पश्येत तावत्तदा व्यर्थोऽपि सुखरूपप्रयो-

जनरहिताऽपि दुःखनिवहं वहती च वहत्यपि असौ संसृतिः क्रियार्था निवृत्तधर्मभगवदपरोक्षज्ञानलक्षणक्रियार्था प्रतिसंक्रमेत भवतीति । संसारे विद्यमानोऽपि जनः । यदा सर्वोऽपींद्रियव्यापार ईश्वराधीन इति पश्यति तदेश्वरानुग्रहेण निवृत्तधर्मान्कृत्वांतःकरणशुद्धिं संप्राप्य भगवदपरोक्षज्ञानं च संपाद्य मुक्तो भवतीति भावः ॥ ता० अर्थः ॥ माया शब्दस्यानेकार्थत्वात् । मायाबलमित्यनेन कस्या बलमुच्यत इति न ज्ञायत इत्यतो मायाबलमित्यनूद्यव्याचष्टे ॥ **मायाबलमिति** । मायाबलमित्यत्र मायाशब्देन भगवदिच्छयैव ग्राह्येत्यत्र नियामकं प्रमाणेनैवाह ॥ **ज्ञेयत्वमिति** । यस्मिन्ग्रंथे यस्या मायाया ज्ञेयत्वं मोक्षार्थं ज्ञेयत्वमुच्यते । तस्मिन्ग्रंथे सा माया हरेरिच्छया । अथवा । बलं । तत्र माया शब्देन हरेरिच्छा बलं वा ग्राह्यमिति यावत् । यस्मिन्ग्रंथे मयायाः सकाशाद्दुर्घटस्यापि घटनोच्यते । तस्मिन्ग्रंथे सा माया हरेरिच्छा बलं वा । यस्मिन्ग्रंथे यस्या मायाया अधिकशक्तितोच्यते । तस्मिन्ग्रंथे सा माया हरेरिच्छा बलं वा । यस्मिन्ग्रंथे यस्या मायाया ईश्वरेणापि परमेश्वरेणाप्यभेद उच्यते । तस्मिन्ग्रंथे सा माया हरेरिच्छा बलं वा । यस्मिन्ग्रंथे यस्या मायायाः सृष्ट्यादौ भगवत्कर्तृकसृष्ट्यादावंतरंगता आत्मांगसाधनतोच्यते । तस्मिन्ग्रंथे सा माया हरेरिच्छा बलं वा । यस्मिन्ग्रंथे यस्या मायाया भगवत्तंत्रता भगवदधीनता । तद्भार्यत्वं सुरूपतेति वाच्यते । तस्मिन्ग्रंथे सा माया श्रीः । यस्मिन्ग्रंथे मायापरिणामिनीति स्मृता प्रतिपादिता सा माया । जडप्रकृतिरिति शेषः । यस्मिन्ग्रंथे माया दोषयुक्तेति सदा जगद्बंधात्मिकेति स्मृता । यस्या मायायाः सकाशाद्दोषाः कामक्रोधादिदोषा भवंतीति चोच्यते । यस्यास्तथा चेतनतोच्यते । सा माया शैवली या माया शैवलीति प्रसिद्धा । सर्वोऽपींद्रियव्यापार ईश्वराधीन इत्युक्तमर्थं प्रमाणेन स्थापयति ॥ **ध्याय इति** । जीवस्येंद्रियभुंक्तेंद्रियकारणकविषयभोगार्थं ध्याये मंस्ये तथा पश्ये श्रृणोमीत्यनुव्यवसायसिद्धध्यानादि व्यापाराणां साधन इंद्रियाणां या विभक्तया यत्पृथक् पृथक् शक्तिमत्त्वं सा हरेरिच्छा बलात् । इंद्रियार्थमित्यस्यार्थमाह ॥ **इंद्रियाणामिति** । इंद्रियसंबुद्धिविषयभोगार्थं । इंद्रियकरणविषयभोगार्थमिति यावत् । व्यर्थाऽपीत्यस्य व्यवहितेन दुःखनिवहंतीत्यनेनान्वय इति क्रियार्थेत्यस्य लौकिकक्रियार्थेत्यर्थ इति च भ्रमं वारयितुं व्यवहितेन क्रियार्थेत्यनेनान्वयं सूचयन् क्रियार्थेत्यस्य धर्मादि क्रियार्थेत्यर्थ उक्त इति ॥ ९ ॥ **सत्क्रियार्थो धर्म इत्यस्य** सत्क्रियार्थो निर्दुष्टयज्ञादि क्रिया च तज्जन्यार्थश्च सत्क्रियार्थो धर्म इत्यर्थः । एतेन धर्म इत्यनेन पूर्णत्वात् । सत्क्रियार्थ इत्येतद्व्यर्थमिति दूषणं निरस्तं । धर्म इत्यनेन यज्ञादि सत्क्रिया तज्जन्यादृष्टस्य वा ग्रहणमिति भ्रांतिः स्यात् । तन्निरासार्थमुभयोरपि ग्रहणमिति वक्तुं सत्क्रियार्थमित्यस्य वक्तव्यत्वात् ॥ १३ ॥ अयमधिकारी स्वरूपेणाभिन्नेन देहानियामकेन मया मद्रूपविशेषणोपेतं भूतेंद्रियगुणाशयै रहितमात्मानं हृदिस्थितं जीवनियामकं रूपं यदा पश्यन् भवति । तदा स्वाराज्यं मोक्षमृच्छति ॥ ११ ॥

प्राप्नोतीति । अयमधिकारी मया मम स्वरूपेण स्वरूपस्य मया भिन्नस्य रूपविशेषस्योपपादाब्जसमीपे इतं स्थितं प्राणेंद्रियगुणाशयैरहितं आत्मानं स्वात्मानं यदा पश्यन् भवति । तदा स्वाराज्यं मोक्षमृच्छतीति वा । जीवनियामकभगवद्रूपस्य देहनियामकरूपस्य चाभेदं मयोपेतमित्युक्तेरयोगाद्भेद इत्याशंकानिरासार्थं जीवनियामकरूपस्य चाभेदेऽपि रूपविशेषाभिप्रायेण मयोपेतमिति साहित्योक्तिर्युज्यत इति भावेन भागवते स्वरूपेणेत्युक्तमित्यभिप्रेत्य स्वरूपेण मयोपेतमित्यनूद्याचार्यैर्हृदिस्थं जीवरूपं हि परमेश्वरसहितं भवतीति तात्पर्य उक्तः । अनेनाद्ययोजना सूचिता । एवं द्वितीययोजनाऽपि द्रष्टव्येत्यभिप्रायेण योजनाद्वयं प्रमाणेनापि सूचयितुं त्यक्त्वा देहाद्यात्मभावं जीवरूपे हृदिस्थिते । दृष्ट्वात्मभावं तं चापि हरिपादाब्जसंस्थितं । यदा पश्यत्यापरोक्ष्यात्तदा मुक्तं व्रजत्यसाविति दत्तात्रेययोग इति प्रमाणमुदाहृतं ॥ तस्यार्थः ॥ असावधिकारी यद्देहाद्यात्मभावं सस्थितं तं जीवमापरोक्ष्यात्पश्यतीत्यपि पश्यति च । तदा मोक्षं व्रजतीति ॥ ॥ ३३ ॥ इति श्रीभागवतटिप्पण्यां दशमोऽध्यायः ॥ ३--१० ॥ ॥

॥ हरिः ॐ ॥ अनिमित्तस्येत्येतत् अ शब्दः परमेश्वरवाची । तेन तदर्पणबुद्धिर्लक्ष्यते । परमेश्वरार्पणबुद्धिर्निमित्तं यस्य तद निमित्तं तस्य परमेश्वरार्पणबुद्ध्या कृतस्येति यावदिति व्याख्येयं ॥ ता० अर्थः ॥ एतेन अ शब्दवाचित्वात् । अनिमित्तस्येत्यस्य ब्रह्मणा कृतस्येत्यर्थो वक्तव्यः । ब्रह्मार्पण–बुद्ध्या कृतस्येत्यर्थकथनमनुपपन्नमिति चोद्यं निरस्तं । सर्वस्यापि ब्रह्मणा कृतस्य धर्मस्येति विशिष्योक्तेरयोगात् । ब्रह्मवाचकेना शब्देन ब्रह्मार्पणबुद्धिं लक्षयित्वाऽनिमित्तस्येत्यस्य ब्रह्मार्पणबुद्ध्या कृतस्येत्यर्थ उक्त इत्यभ्युपगमात् ॥ ९ ॥ आत्मनः परमात्मनः सकाशाद्यो गुणवैषम्यं गुणवैषम्यनामकमहतो महत्तत्त्वस्य सर्गो भवति । तु शब्द एवार्थे । स तु स एवाद्य इति । ननु महत्तत्त्वसर्गस्य गुणवैषम्यनामकत्वं कथं चेत् । उच्यते । महत्तत्त्वोपादानीभूता दशरजोभागाः प्रलयकाले सत्त्वेन सह मूलप्रकृतौ प्रविष्टाः । सृष्टिकाले प्रकृतिकार्यसत्त्वगुणं विहाय प्रकृतिकार्यरजोगुणेन संबंधा भवंति । महत्तत्त्वोपादानीभूतैको रजोभागः प्रकृतिकार्यरजोगुणेन संबंधो भवति । एवं महत्तत्त्वोपादानीभूता द्वादशरजोभागाः स्वसंबंधाभावाभावाभ्यां सत्त्वरजस्तमोगुणानां वैषम्यसंपादकत्वात् । गुणवैषम्यनामकः । तज्जन्यत्वान्महत्तत्त्वं गुणवैषम्यनामकं । तत्संबंधात् । महत्तत्त्वसर्गोऽपि गुणवैषम्यनामकः ॥ता०अर्थः॥ महत्तत्त्वसर्गस्य गुणवैषम्यनामकत्वमुपादानीभूतानां द्वादशरजोभागानां गुणवैषम्यनामकत्वेन तेषां च गुणवैषम्यनामकत्वं सत्त्वरजस्तमोगुणनिष्ठवैषम्यावस्थासंपादकत्वेनेत्यभिप्रेत्य गुणनिष्ठवैषम्यावस्थाज्ञानार्थं गुणानां साम्यावस्था ज्ञातव्या । अतो गुणसाम्यावस्थानिरूपणार्थं गुणानां स्थितिस्तावदुच्यते ॥ तमसो रजस्तु द्विगुणमित्यादिना तद्दशांशेन तु रज इत्यंतेन । इदानीं गुणनिष्ठ साम्यावस्थां निरूपयति ॥ **मूलजमिति** । मूलजं

महत्तत्त्वमूलरजोगुणतमोगुणाभ्यामभिव्यक्तं महतत्त्वं मूलरजोगुणतमोगुणाभ्यां बहिरागत्योपादानरूपेण । महत्तत्त्वे प्रविष्टमिति यावत् । यद्रजोद्वादशभागात्मकं रजस्तत् तदेव विलये प्रलयकाले दशांशतो दशांशैः सत्त्वं सत्त्वगुणं मिश्रितं भवति । एकांशेन तमस्यपि तमोगुणेऽपि मिश्रितं भवति । उपलक्षणमेतत् । एकांशेन रजोगुणेऽपि मिश्रितं भवतीत्येतद्धि प्रमाणप्रसिद्धं । बुधा एतां गुणानां महत्तत्त्वोपादानरजोमिश्रत्वावस्थां साम्यावस्थां विदुः। महत्तत्त्वोत्पत्तिप्रकारं दर्शयति॥ यदा स्विति । यदा यद्दशभागात्मकं रजः सत्त्वे प्रविष्टं यच्चैकभागात्मकं रजो रजोगुणेप्रविष्टं यच्चैकभागात्मकं रजस्तमोगुणे प्रविष्टं तत्सर्वं द्वादशभागात्मकं रजस्तमसा तमोगुणप्रविष्टतमोभागेन सह संगतं भवति । तदा तु तदेव पूर्वोक्तत्रयोदशभागेभ्यो महत्तत्त्वं भवति । ननु महत्तत्त्वस्य पूर्वोक्तरीत्या त्रयोदशभागोत्पन्नत्वे महत्तत्त्वं चतुर्भागसंभवमिति ग्रंथांतरोक्तेः का गतिरित्यत आह ॥ तदिति । यत्त्रयोदशभागजन्यं महत्तत्त्वं तत् विवक्षाविशेषेणं ग्रंथांतरे चतुर्भागसंभवमित्युच्यते । तेन महत्तत्त्वस्य त्रयोदशभागजन्यत्वात् । तच्चतुर्भागसंभवमिति कथं चतुर्भागजन्यत्वमुच्यते इति शंकानवकाशः । विवक्षाविशेषेण ग्रंथांतर इति पदयोः शेषेण तच्चतुर्भागसंभवमित्यस्य तत् महत्तत्त्वं विवक्षाविशेषेण ग्रंथांतरे चतुर्भागसंभवमित्युच्यते इत्यर्थ इत्युक्तत्वात् । विवक्षाविशेषं दर्शयति ॥ तत्रेति । ये दशरजोभागाः प्रलयकाले सत्त्वे गुणे प्रविष्टास्तेषामेकत्वस्य विवक्षया तत्र त्रिभागो रजस इत्युक्तं । यदर्थं गुणसाम्यावस्थानिरूपणं तदिदानीमाह ॥ तदाहुरिति । यत् विवक्षाभेदेन त्रयोदशभागजन्यं चतुर्भागजन्यं च ब्रह्मणो विरिंचस्य रूपं शरीरं तन्महत्तत्त्वं सृष्टिकाले सत्त्वगुणे प्रवेशाभावेन गुणानां वैषम्यावस्थायाः संपादकैर्द्वादशरजोभागैर्जन्यत्वाद्वैषम्यनामकं । उपलक्षणमेतत् । महत्तत्त्वसर्गोऽपि गुणवैषम्यनामक इति ज्ञानिन आहुरिति । ॥ ततश्चायं तात्पर्यस्य निष्कृष्टोऽर्थः ॥ सृष्टिकाले प्रकृतेः सकाशात् सत्त्वगुणो रजोगुणस्तमोगुणश्चोत्पन्नो भवति । तत्र तमोगुणाद्रजोगुणो द्विगुणः । रजोगुणात्सत्त्वगुणो द्विगुणः । तत्र सत्त्वगुण इतरगुणमिश्रितो न भवति । रजोगुणस्तमोगुणश्चेतरगुणमिश्रितो भवति । तथा हि । तमोगुणस्यैको भागः । तच्छतगुणो रजोभागः । तच्छतगुणः सत्त्वभाग इत्येतावता रजोगुणो भवति । एको रजोभागस्तद्दशगुणस्तमोभागस्तद्दशगुणः सत्त्वभाग इत्येतावता तमोगुणो भवति । महत्तत्त्वोपादानीभूतास्त्रयोदशभागाः । तत्र द्वादशभागा रजस एको भागस्तमसः । तत्र प्रलयकाले दशरजोभागाः प्रकृतिकार्यं सत्त्वगुणं प्रविशंति । एको रजोभागः प्रकृतिकार्यं रजोगुणं प्रविशति । एको रजोभागः प्रकृतिकार्यं रजोगुणं प्रविशति । एको रजोभागः प्रकृतिकार्यं तमोगुणं प्रविशति । तमोभागः प्रकृतिकार्यं तमोगुणं प्रविशति। तत्त्रयाणामपि गुणानां महत्तत्त्वोपादानरजोमिश्रत्वसाम्यादियमेव गुणानां साम्यावस्था । अनंतरं सत्त्वगुणः स्वप्रविष्टरजोभागैः सह मूलप्रकृतिं प्रविशति । रजोगुणः स्वप्रविष्टैकरजोभागेन सह

मूलप्रकृतिं प्रविशति । तमोगुणः स्वप्रविष्टाभ्यां रजस्तमोभागाभ्यां सह मूलप्रकृतिं प्रविशति । सृष्टिकाले सत्त्वगुणः स्वप्रविष्टदशरजोभागान्मूलप्रकृतौ स्थापयित्वा शुद्ध एव बहिरायाति । रजोगुणः सत्त्वगुणत्यक्तमूलप्रकृतिस्थितदशरजोभागान् स्वप्रविष्टैकरजोभागं च गृहीत्वा बहिरायाति । सत्त्वगुणस्य महत्तत्वोपादानरजोमिश्रितत्वाभावात् । रजोगुणतमोगुणयोर्महत्तत्वोपादानरजोमिश्रितत्वादियं गुणानां वैषम्यावस्था । अनंतरं दशभागात्मकं रजः सृष्टिकाल एव रजोगुणप्रविष्टं यदेकभागात्मकं रजः सृष्टिकाले प्रलयकाले च तमोगुणप्रविष्टं तत्सर्वं द्वादशभागात्मकं रजोगुणो रजोगुणतमोगुणाभ्यां बहिरागत्य सृष्टिकाले प्रलयकाले च तमोगुणप्रविष्टेन बहिरागतेन तमोभागेन संगतं भवति । तदा संगतैस्त्रयोदशभागैर्महत्तत्वं भवति । गुणवैषम्यसंपादकद्वादशरजोभागजन्यत्वात् । महत्तत्वं गुणवैषम्यनामकं तत्संबंधान्महत्तत्वसर्गोऽपि गुणवैषम्यनामक इति ॥ १४ ॥ अत्र महत्तत्वादित्यादि पदानां शेषः । यस्माद्द्रव्यज्ञानक्रियादयो भवंति । तत्र तस्याहमोऽहंकारतत्त्वस्य महत्तत्वाद्यसर्गः । सतु स एव द्वितीयः । अत्र द्रव्य शब्देन सुवर्णादि द्रव्यजनकभूतानि ज्ञानशब्देन ज्ञानजनकज्ञानेंद्रियाणि क्रिया शब्देन क्रियाजनककर्मेंद्रियाणि आदि शब्देन मनोदेवतादेहाश्चोच्यंते । अहंकारस्त्रिविधः । तामसस्तैजसो वैकारिकश्चेति । तत्र तामसाहंकारादाकाशादि भुतान्युत्पन्नानि । तैजसाहंकारास्ज्ञानेंद्रियाणि कर्मेंद्रियाणि चोत्पन्नानि । वैकारिकाहंकारान्मनोदेवतादेहाश्चोत्पन्ना इति विवेकः । तन्मात्रद्रव्यशक्तिमानित्यत्र तन्मात्रेति ह्रस्वः छांदसः । यस्तन्मात्राशक्तिमान् स्पर्शादि तन्मात्राजनकशक्तिमान् । द्रव्यशक्तिमान् सुवर्णादि द्रव्यजनकशक्तिमान् भूतसर्ग आकाशादीनां पंचानां भूतानां सर्गः । स तु स एव तृतीयः। यद्यपि भूतानामेव तन्मात्राद्रव्यशक्तिमत्त्वं । तथाऽपि भूतसर्गस्य तन्मात्राद्रव्यशक्तिमत्वमुपचारेणोक्तं । तन्मात्राजनकशक्तिमत्त्वं न सर्वेषां भूतानां किंत्वाकाशादीनां चतुर्णामेव । पृथिव्यास्तु तत्साहचर्यादुपचारेणेति मंतव्यं । सुवर्णादीनां द्रव्य शब्दवाच्यत्वं तु विवादादि निमित्तकशीघ्रगमनात्साकल्येन प्राप्यत्वात् ॥ ता० अर्थः ॥ तादृशांशा इत्यारभ्य तमोज्ञेयमित्यंतेन महत्तत्त्वे प्रविष्टानां महत्तत्त्वादि गुणानां परिमाणमुच्यते । एकस्तमोभागस्तद्दशगुणो रजोभागस्तद्दशगुणः सत्त्वभाग इति विवेकः । अहंकारस्तदात्मकः महत्तत्त्वात्मकः । महत्तत्त्वादुत्पन्न इति यावत् । ननु महत्तत्त्वे प्रविष्टानां सत्त्वभागानामधिकत्वात्तदुत्पन्नाहंकारतत्त्वेऽपि सत्त्वभाग एवाधिको वक्तव्यः । अतोऽहंकारतत्त्वाभिमानी रुद्रः सात्त्विक एव । कथं तामस इत्युच्यत इत्यत आह ॥ स रुद्र इति । यतो विरिंचापेक्षयैव रुद्रे सत्त्वं न्यूनमतः स रुद्रस्तामसोज्ञेयः । अनेन रुद्रस्य तामस शब्दवाच्यत्वे विरिंचापेक्षया न्यूनेन सत्त्वगुणोपेतत्वं प्रवृत्तीनिमित्तमित्युक्तं भवति । विरिंचापेक्षयैवेत्येवकारव्यावृत्तिं दर्शयति ॥ इतरापेक्षयेति । इतरापेक्षयेति इंद्राद्यपेक्षया रुद्रे सत्वमधिकं । अहंकारतत्त्वे प्रविष्टानां

सत्त्वादि गुणानां परिमाणमाह ॥ सत्त्वाद्या इति । अस्याहंकारतत्त्वस्य सत्त्वाद्याः सत्त्वगुणाद्याः । तद्वदस्य । च शब्द एवार्थे । तद्वदेव महतत्त्वादेव परिमाणेनोपेताः । एकस्तमोभागस्तद्दशगुणो रजोभागस्तद्दशगुणः सत्त्वभाग इति विवेकः । मन आद्याः । आद्य शब्देन देवदेहा गृह्यंते । मनोदेवदेहाश्च तत्तमोंऽशात् तस्य महत्तत्त्वस्य पूर्वोक्तरीत्या तमः शब्दवाच्योऽहंकारसंज्ञको योंऽशस्तस्माद्बहिरागतः सात्त्विकोंऽश इति प्रकीर्तितः । मनोदेवतादेहाश्चाहंकारतत्त्वस्य सात्त्विकेनांशेनोत्पन्ना इति यावत् । इंद्रियाणि ज्ञानेंद्रियकर्मेंद्रियाणि अहंकारतत्त्वाद्बहिरागतो राजसोंऽशस्तु । तु शब्द एवार्थे । राजसोंऽश एवेति कीर्तितानि । अहंकारतत्त्वस्य राजसेनांशेनेंद्रियाण्युत्पन्नानीति यावत् । खादय आकाशादयोऽहंकारतत्त्वाद्बहिरागतास्तामसोंऽशश्च तामसोंऽश एवेति कीर्तिताः । आकाशादयोऽहंकारतत्त्वस्य तामसेनांशेनोत्पन्ना इति यावत् । अयमत्र निष्कृष्टोऽर्थः । अहंकारतत्त्वं भागत्रयात्मकं । तत्रैको भागोऽधिकसत्त्वोपेतत्वात् । सात्त्विक इत्युच्यते । स एव वैकारिकाहंकार इत्युच्यते । स भागोऽहंकारतत्त्वाद्बहिरागत्य ज्ञानेंद्रियकर्मेंद्रियाण्युत्पादयति । तृतीयो भागोऽधिकतमसोपेतत्वात् । तामस इत्युच्यते । स एव तामसाहंकार इत्युच्यते । स एवाहंकारतत्वाद्बहिरागत्याकाशादि भूतान्युत्पादयतीति । यतो भूतेषु भूतोत्पन्नेषु सुवर्णादिषु विवादादि निमित्तेनेत्यादि पदानां शेषः । विवादादि निमित्तेन लोकानां द्रवणं शीघ्रगमनं भवति । अतो भूतानि द्रवणप्राप्यसुवर्णादि जनकशक्तिमत्त्वात् द्रव्यशक्तीनीत्युच्यंते । यतः स्पर्शतन्मात्रादीनामित्यादि पदानां शेषः । स्पर्शतन्मात्रादीनां शब्दाद्यात्मकता । अतो भूतानि तन्मात्राशक्तीनि तन्मात्राजनकशक्तिविशिष्टानि । अनेन स्पर्शतन्मात्रादीनामाकाशादिभूतजन्यत्वाभावे यदि स्पर्शादितन्मात्रा आकाशादिजन्या न स्युस्तर्हि स्पर्शादितन्मात्रास्वाकाशादि गुणानां शब्दादीनामनुवृत्तिर्न स्यादिति बाधकमुक्तं भवति । न केवलं भूतानि द्रव्यशक्तीनि किंतु तन्मात्राशक्तीनि चेति समुच्चयार्थस्तथा शब्द इति ॥ १५–१६ ॥ प्रभो विरिंचादबुद्धिकृतोऽ बुद्ध्या कृतः । अथवा । हरिपूजाबुध्या कृतः । यस्तमसोऽविद्यायाः सर्गः । स तु एव षष्ठ इत्यर्थः । यथाऽबुद्धिकृतं कार्यं हेयं भवति । तथा तमसः सर्गस्य हेयत्वादबुद्धिपूर्वकत्वमुपचारेणोक्तं । एतेन विरिंचसृष्टेः सर्वस्यापि बुद्धिपूर्वकत्वात् । तमसः सर्गोऽबुद्धिपूर्वं कृत इति वचनमनुपपन्नमिति दूषणं निरस्तं । अबुद्धिपूर्वं कृत इत्यनेनोक्तमबुद्धिपूर्वकत्वमौपचारिकमित्युक्तत्वात् । एतेनैव हेयस्य तमसः सृष्टिर्विरिंचेन कथं कृतामिति शंका परास्ता । अबुद्धिकृत इत्यत्र परमात्मवाचकेन अ शब्देन परमात्मपूजां गृहीत्वा परमात्मपूजाबुद्ध्या कृत इत्यर्थांतरस्योक्तत्वात् ॥ ता० अर्थः ॥ अनेनाबुद्धिकृत इति मूलस्थपदमबुद्धिपूर्वमिव कृतः । यथाऽहंकारादि सृष्ट्या हरिपूजा भवति । यथाऽविद्यासृष्ट्या दैत्यादीनां मोहे जाते हरिपूजा भविष्यतीत्येवं बुद्ध्या कृत इति द्वेधा व्याख्यातं भवति । ॥ १३ ॥

उत्पन्नेति वक्तव्ये प्रादुर्भूतेत्युक्त्या पूर्वमविद्येश्वरेणोत्पन्नाऽनंतरं विरिंचेन प्रादुर्भूतेत्युक्तं भवति । एतेनाद्यस्तु महतः सर्गो गुणवैषम्यमात्मन इत्यादिना महदादिसृष्टिः परमेश्वराज्जातेत्युक्तत्वात् अविद्यासृष्टिः परमेश्वराज्जातेति वक्तव्यं । विरिंचाज्जातेति कथनमयुक्तमिति शंकानवकाशः । अबुद्धिकृत इत्यस्याबुद्ध्योत्पन्न इत्यर्थो न भवति । किंत्वबुद्ध्या प्रादुर्भूत इत्यर्थ इत्यंगीकारात् । यद्यपि परमात्मजन्योऽविद्यायाः सर्गः । सृष्टस्तथाऽपि तत्संबंधित्वाद्विरिंचेन प्रादुर्भूतोऽविद्यायाः सर्गोऽपि षष्ठ इत्युच्यते ॥ १७ ॥ अंतःस्पर्शा इत्यस्येयं योजना । अंतःशब्देन समीपस्था गृह्यंते । अप्रयत्नादिष्टानां प्रत्यक्षतदनुकूलानुमानाभ्यामिति योग्यतया संबध्यते । स्पर्श शब्देन ज्ञानं गृह्यते । ततश्चांतःस्पर्श इत्यनेन प्रयत्नात्समीपस्थानामिष्टानां प्रत्यक्षतदनुकूलानुमानाभ्यां ज्ञानं येषां तेंऽतःस्पर्शा इत्यर्थो लभ्यत इति ॥ ता० अर्थः ॥ यद्यस्मात्कारणात्तिरश्चीनानां स्थावराणां चाप्रयत्नात् यच्च समीपस्थितं यच्च हृद्गमिष्टं तस्य ज्ञानं प्रत्यक्षतदनुकूलानुमानाभ्यां भवति । अतस्तिरश्चीनाः स्थावराश्चांतः स्पर्शा इतीरिताः । अनेन स्थावरा एवांतस्पर्श शब्दवाच्या इति भ्रमः परिहृतो भवति । प्रत्यक्षानुमानाभ्यामित्येतद्याावर्त्य दर्शयति ॥ न शास्त्रत इति । तिरश्चीनानां स्थावराणां चाप्रयत्नात्समीपस्थितानामिष्टानां ज्ञानं प्रत्यक्षतदनुकूलानुमानाभ्यां भवति । न शास्त्रतदनुमानाभ्यामिति ॥ १९ ॥ हृद्यवेदिन इत्यस्येयं योजना । हृच्छब्दो हृदयंगमप्रतिपादकः सन्निकृष्टपरः । सप्तम्या अलुक् । अप्रयत्नात्समीपस्थिते प्रत्यक्षानुमानाभ्यामिति योग्यतया संबध्यते । वेदिन इत्यत्र ज्ञानार्थकाद्वेदन शब्दान्मत्वर्थे इति प्रत्ययः । ततश्च हृदिवेदिन इत्यनेनाप्रयत्नात्समीपस्थिते इष्टे विजये प्रत्यक्षानुमानाभ्यां ज्ञानं येषामस्ति ते हृदिवेदिन इत्यर्थो लभ्यत इति । प्रवृत्तिनिमित्तस्य विद्यमानत्वात्स्थावराणामपि हृदिवेदिन इति शब्दवाच्यं द्रष्टव्यं । अत्र प्रमाणं तु प्रागुदाहृतमेव ॥ २० ॥ इति श्रीभागवतटिप्पण्यामेकादशोऽध्यायः ॥ ३–११ ॥ ॥ ॥

॥ हरिः ॐ ॥ ते द्वेघटिके मुहूर्तं विदुरिति पूर्वेणान्वयः । षट्घटिकाः प्रहर इति विदुः । अनेन दिवा रात्रौ च पंच प्रहराः । एकैक प्रहरस्य षट् घटिकाः । एवं च दिवा रात्रौ च षट् घटिका भवंतीत्युक्तं भवति । यद्यपि यदा दिवा रात्रौ वा त्रिंशद्घटिकापेक्षयाऽधिको न्यूनो वा कालो भविष्यति । तदा प्रहरस्य षट् घटिकापेक्षयाऽधिको वा न्यूनो वा कालो भविष्यति । तथाऽपि अल्पत्वेनाविवक्षामाश्रित्य प्रहरः षट् घटिका भवंतीत्युक्तं । सप्त घटिका नृणां याम इति विदुः । अनेन दिवा रात्रौ च चत्वारो यामाः । एकैक यामस्य सप्त घटिकाः । एवं च दिवा रात्रौ चाष्टाविंशति घटिका भवंतीत्युक्तं भवति । यद्यपि दिवा रात्रौ वाऽष्टाविंशति घटिकापेक्षयाऽधिको वा न्यूनो वा कालो भविष्यति । तदा यामस्य सप्तघटिकापेक्षयाऽधिको वा न्यूनो वा कालो भविष्यति । तथाऽप्यल्पत्वेना-

विवक्षामाश्रित्य यामस्य सप्त घटिका भवंतीत्युक्तं । वा शब्दोऽनुक्तविकल्पे । अष्टौ वा घटिका नृणां यामः । अनेन दिवा रात्रौ प्रत्येकं चत्वारो यामाः । एकैक यामस्याष्टघटिकाः । एवं च दिवा रात्रौ च द्वात्रिंशति घटिका भवंतीत्युक्तं भवति । यद्यपि दिवा रात्रौ वा त्रिंशद्घटिकापेक्षयाऽधिको वा न्यूनो वा कालो भविष्यति । तदा यामस्याष्ट घटिकापेक्षयाऽधिको वा न्यूनो वा कालो भविष्यति । तथाऽप्यल्पत्वेनाविवक्षामाश्रित्य यामस्याष्टघटिका भवंतीत्युक्तमिति ॥ ता० अर्थः ॥ यामस्य सप्तौ वाऽष्टौ वा घटिका इत्युक्तं । कस्मिन्काले यामस्य सप्त घटिकाः कस्मिन्काले यामस्याष्टघटिका इत्याशंकापरिहारार्थं निर्णायकहेतुद्वयमनेनोच्यते ॥ राशिभेदात् । धनुरादि राशिभेदात् । घटिकानामिति शेषः । घटिकानामूनातिरेकाद्वा । या मस्येति शेषः । वा शब्दोऽनुक्तविकल्पे । यामस्य सप्तौ वाऽष्टौ वा घटिका इति निर्णयः । कर्तव्य इति शेषः ॥ अयं भावः ॥ यदा धनुरादि राशिरायाति । तदा यामस्य दिवा सप्त घटिका रात्रावष्टौ घटिका इति निर्णयः कर्तव्यः । यदा दिवा द्वात्रिंशद्घटिका भवंति । तदा यामस्य दिवा अष्टौ घटिका रात्रौ सप्त घटिका इति निर्णयः कर्तव्य इति ॥ ८ ॥ मनुः स्वंस्वं कालं भुंक्ते । स्वकालः क इत्यत आह ॥ साधिकेति । साधिका सार्धाष्टादशलक्षाधिका । महायुगानामिति शेषः । महायुगानामेकसप्ततिः एकाधिका सप्ततिः स्वकालः । उपलक्षणमेतत् । सहस्रसंवत्सराणां विंशतिमनूनां प्रलयकाल इत्यपि द्रष्टव्यं ॥ अत्रायं विवेकः ॥ सहस्रद्वयं प्रथममनोः प्रलयकालः । द्वितीयमारभ्य षष्ठपर्यंतानां मनूनां प्रत्येकं चतुःशतोत्तरसहस्रं प्रलयकालः । सप्तममारभ्य द्वादशपर्यंतानां मनूनां पंचशत्तोत्तरसहस्रं प्रलयकालः । त्रयोदशमनोर्द्विशताधिकसहस्रं प्रलयकालः । चतुर्दशमनोर्द्विशतन्यूनसहस्रं प्रलयकाल इति ॥ ता० अर्थः॥ युगैकसप्ततेः महायुगानामेकाधिकसप्ततेरूर्ध्वं वत्सराणां मनुष्यवत्सराणां सार्धाष्टादशलक्षकं मनोः प्रत्येकं भुक्तिः भुक्तिकालः । मनूनां भोगकालमुक्त्वा प्रलयकालमाह ॥ सहस्रमिति ॥ अथवा ॥ अपि वेति शब्दौ व्यवस्थितविकल्पे । मनोर्मनूनां शतानां वत्सराणां चतुरुत्तरसहस्रं ॥ अथवा ॥ शतानां पंचोत्तरसहस्रं । अपि वा द्विसहस्रं प्रलयः प्रलयकालः । व्यवस्थां दर्शयति ॥ आद्येष्विति । आद्येष्विति पदसामर्थ्यात् द्वितीयेषु त्रयोदशचतुर्दश इत्यपि लभ्यते । आद्येषु षट्शतानां चतुरुत्तरसहस्रं द्वितीयेषु षट्शतानां पंचोत्तरसहस्रं त्रयोदशे द्विसहस्रं द्विशताधिकं सहस्रं चतुर्दशे द्विसहस्रं द्विशतन्यूनं सहस्रं । आद्येषु षट्चतुरुत्तरसहस्रमित्युक्तस्यापवादमोह ॥ प्रथम इति । आद्येषु षट् प्रथमे द्विसहस्रद्वयं प्रकीर्तितं । प्रलयश्चैवेत्येव शब्द एवमित्यनेन संबध्यते । एवमेवेंद्रादीनां । ह्रस्वः छांदसः । ईंद्रादीनां प्रलयश्चेति च शब्दोऽत इत्यनेन संबध्यते । अंतश्च प्रलयकालो भोगकालश्च भवेदिति ॥ २४ ॥ अन्ये पूर्वोक्तब्रह्मांडादन्ये कोटिशः कोटिसंख्याका अंडराशयः । भगवत्स्वरूपाणा-

मिति शेषः । भगवत्स्वरूपशरीराण्यंतर्गताः संतो लक्ष्यंत इति ॥ अयं भावः ॥ यथैकमेव गृहमनेकेषु दर्पणेषु प्रतिफलति । तथैकमेव ब्रह्मांडं भगवत्स्वरूपशरीरेषु प्रतिफलति । दर्पणेषु प्रतिफलितानां गृहाणां भेदः । भगवच्छरीरेषु प्रतिफलितानां ब्रह्मांडानां सीतातत्प्रतिकृतिनिष्ठाभरणानामिवाभेद इति विशेष इति ॥ ता० अर्थः ॥ स्वशरीराणि भगवादिति योग्यतया संबध्यते । भगत्स्वरूपशरीराण्यंतर्गताः । यस्य पृथिवी शरीरमित्याद्युक्तपृथिव्याद्यौपचारिकशरीरव्यावृत्यर्थं स्वशरीराणीत्युक्तं । अंतरांतरेण योग इवांतर्योगेऽपि द्वितीयाया उपसंख्यानात्स्वशरीराणीति द्वितीया । शरीराणां भगवत्स्वरूपशरीराणां बहुत्वेनांडांतानां बहुत्वं । अंडबहुत्वे शरीरबहुत्वं कथं निमित्तमित्यत आह ॥ अस्येवेति । अस्य प्रसिद्धस्य ब्रह्मांडस्यैव देवकार्येषु नारायणशरीरेषु । सर्वेष्विति शेषः । सर्वेषु च सर्वेष्वपि विष्णुसामर्थ्यतः । प्रतिप्रतिदर्शनात् प्रतिफलनात् । तथाऽतीतानागतैर्ब्रह्मांडैः सह वर्तमानब्रह्मांडस्य बहुत्वं । अन्यथा पूर्वोक्तप्रकारद्वयात् अन्यथांऽडानां बहुत्वं न भवेत् । यथा दर्पणेषु प्रतिफलितानां गृहादीनां भेदस्तथा भगवच्छरीरेषु प्रतिफलितानां ब्रह्मांडानां भेदं प्रति भ्रमं प्रमाणद्वयोदाहरणेन परिहरति ॥ एकमिति । ब्रह्मा विरिंचः अंडं ब्रह्मांडं हरेः प्रत्येकं रोमकूपं रोमकूपेषु प्रतिफलितं सदेकं बहुत्वेनावच्छिन्नत्वं जातमित्यपश्यत् । यथाऽऽत्मानं स्वात्मानं तेषु ब्रह्मांडेषु पृथक् पृथगपश्यत् । एकं ब्रह्मांडं बृहद्ब्रह्मभवादिति ॥ ४० ॥ इति श्रीभागवतटिप्पण्यां द्वादशोऽध्यायः ॥ ३--१२ ॥ ॥

॥ हरिः ॐ ॥ गृहे विद्यमानां वार्ता बहुभ्यः सुवर्णादि प्रतिग्रहः । असंचयः एकैकदिनोपयुक्तसंग्रहवत्त्वं शालीनं । शालि शब्दो धान्यपरः । शाल्यादि धान्यसंबंधिबहुप्रतिग्रहः । शिला क्षेत्रपतितकणिशोपादानं । उंच्छः उलूखलादि समीपपतितकणोपादानं । इत्येता वृत्तीरसृजदिति पूर्वेण संबंध इति । वै शब्दः प्रसिद्धिद्योतनार्थः । एतदेवाभिप्रायेण तात्पर्यं । यत्र यायावर शब्देन सुवर्णादि यायावरं ग्राह्यं । एतेन वार्ता विचित्रशालीनं यायावर्यं शिलोंछनमिति सप्तमस्कंधे विचित्रशालीनं यायावर्यमित्युक्तत्वात् । शालीनमित्यस्य शाल्यादि धान्यसंबंधि यायावर्यमित्यर्थो वक्तव्यः । तथा च । वार्ता शब्देन यायावरमात्रग्रहणेंऽशे पुनरुक्तमिति दूषणमपास्तं । वार्ता यायावरमित्यनेन वार्ता शब्दस्य यायावरमात्रार्थं नोच्यते । किंतु सुवर्णादि यायावरार्थत्वमुच्यत इत्यंगीकारात् । शिलोंछयोरैक्यविवक्षया गृहस्थवृत्तीनां चतुष्टयं ज्ञातव्यं ॥ ४२ ॥ इति श्रीभागवतटिप्पण्यां त्रयोदशोऽध्यायः ॥ ३--१३ ॥ ॥

॥ हरिः ॐ ॥ अथाऽपि प्रजानां न इत्यात्मशक्तिषु इज्यासु पूजारूपेषु आत्मशक्तिषु असच्छक्तिविषयेषु कर्मसु मध्ये केन कर्मणा ते तव शुश्रूषा परमशुश्रूषणं भवेत् । वा शब्द एवार्थे । तद्वा तदेव कर्म विधेहि तुभ्यं नमोऽस्त्विति । एतेन पुजारूपसर्वकर्मभ्यः

शुश्रूषाया जायमानत्वात् । केन शुश्रूषा भवेदिति कथनमनुपपन्नमिति दूषणं परिहृतं । मुख्यामुख्यन्यायेन शुश्रूषा शब्देन परमशुश्रूषाया ग्रहणात् । अत एव परं शुश्रूषणं मह्यमिति वक्ष्यति ॥ ७ ॥ सुनाभसंदीपिततीव्रमन्युरित्यस्य स्वामिन् हिरण्याक्षं शीघ्रं जहि विलंबः कुतः क्रियत इत्युक्त्या सुनाभेन चक्रेण संदीपितोऽभिव्यक्तीकृतस्तीव्रो मन्युरानंदात्मककोपो यस्य स सुनाभसंदीपिततीव्रमन्युरित्यर्थः ॥ ॥ ३३ ॥ इति श्रीभागवतटिप्पण्यां चतुर्दशोऽध्यायः ३–१४ ॥ ॥

॥ हरिः ॐ ॥ ब्रह्मादयो यत्कृतसेतुपाला यत्कृतमर्यादापालकाः इदं विश्वं यत्कारणं यःकारणं यस्य तद्यत्कारणं यस्य विश्वकारणत्वं माययेच्छामात्रेणेत्येतद्धिप्रमाणप्रसिद्धं । हसंति यस्याचरितमित्यत्र विद्यमानो यस्येति शब्दोऽत्रानुवर्तते । तस्य यस्य विष्णोर्गर्भिणीवधपरिहारार्थं पिशाचचर्या कृत्वाऽमंगलत्वं प्राप्तवानिति प्रदर्शनरूपं चरितं विडंबनं परापकीर्तिसंपादकलोकानुकरणं अहो आश्चर्यं चेति । एतेन ब्रह्मादीनां रुद्रकृतसेतुपालकत्वाभावाद्ब्रह्मादयो यत्कृतसेतुपाला इत्ययुक्तमिति दूषणं निरस्तं । यच्छब्देन रुद्रस्यग्रहणमनंगीकृत्य विष्णोर्ग्रहणमित्यंगीकारात् । एतेनैव पूर्वश्लोकेषु रुद्रस्यैव प्रकृतत्वादस्मिन् श्लोके विष्णोर्ग्रहणमनुपपन्नमिति चोद्यं परास्तं । हसंति यस्याचरितमित्यत्र विद्यमानस्य यस्येति शब्दस्यानुवृत्तिमकारांतत्वं चांगीकृत्य अकयप्रविसंभूमसखा हा विष्णुवाचका इति वचनादयं य शब्दो विष्णुवाचीत्यभिधानात् । एतेनैव पिशाचचर्यारूपप्रायश्चित्तविषयानुज्ञाप्रधानस्य विडंबनरूपत्वाभावात्पिशाचचर्यारूपप्रायश्चित्तानुज्ञारूपं चरितं विडंबनमिति वचनमयुक्तमिति दूषणं परिहृतं । रुद्रइत्यादि शेषपूरणेन रुद्रो विष्ण्वाज्ञया पिशाचचर्यां कृत्वाऽमंगलं प्राप्तवानिति प्रदर्शनरूपं चरितं विडंबनमित्यर्थस्योक्तत्वात् । अत एव तात्पर्ये प्रमाणं ॥२८॥ इति श्रीभागवतटिप्पण्यां पंचदशोऽध्यायः ॥ ३–१५ ॥

॥ हरिः ॐ ॥ अनिमित्तेनेत्यस्य अः विष्ण्वर्पणं निमित्तं उद्देश्यं यस्य तेनानिमित्तेनेत्यर्थः । विष्णुवाचकशब्दो विष्ण्वर्पणपरः । निमित्त शब्द उद्देश्यवाचीत्यभ्युपगमात् ॥ १४ ॥ यत्र वैकुंठे सललनाः स्त्रीभिः सहिता वैमानिका विमानेन चरंतः पुरुषा अंतर्जले तु विशेषतो विलसन्मधुमाधवीनां विलसंतीनां वैशाखसंबंधिनीनां सुमनसां अनिलं अनिलेन वायुना आनीतेन गंधेन खंडितधियः खंडिता भगवता वियुक्ता धीः अंतःकरणं येषां ते खंडितधियोऽपि पुनर्भगवत्यंतःकरणं क्षिपंतः स्थापयंतो भर्तुः हरेः लोकशमलक्षपणानि लोकपापविध्वंसकराणि चरितानि गायंतीति । अस्मिन् श्लोकेऽमुक्ता एव प्रतिपाद्याः । न मुक्ताः । मुक्तानां खंडितधीत्वायोगात् ॥ ता० अर्थः ॥ वैकुंठलोकगाः केचन मुक्ता एव केचनाधिकारस्था अमुक्ता एवेति द्वेधा द्विप्रकारावच्छिन्नाः । तत्रामुक्तानां क्वापि कदाचिद्भ्रमो भगवतोऽन्यत्रांतःकरणस्य चलनं । भगवत्खंडित धीत्वमिति यावत् । भवति । च शब्द एवार्थे । मुक्तानां क्वचिदपि कदाचिदपि भ्रमो न च ॥ १५ ॥

नैव भवतीति ॥ १७ ॥ येऽभ्यर्थितां सर्वैःसम्यक् प्रार्थितां यत्र यस्यां नृगतौ सहधर्म निवृत्तधर्मेण सहितं तत्त्वविषयं ज्ञानं अमुष्य भगवत आराधनं चोत्पत्तुमर्हति । तां । भगवज्ज्ञानाराधनयोग्यमिति यावत् । नृगतिं मनुष्यगतिं प्रपन्ना अपि प्राप्ता अपि भगवतो विततया मायया मोहिताः संतः सहधर्मतत्त्वविषयं ज्ञानं न वितरंति न संपादयंति । अमुष्य भगवत आराधनं च न वितरंति न कुर्वंति ते नृगतिं नोपपन्ना मानुषा एव न भवंति । किंतु पशव एव । इत्येतन्नु निश्चितमिति ॥ ता० अर्थः ॥ य इति शब्दस्य नो इत्यनेन व्यवहितत्वादन्वयं दर्शयति ॥ ये नृगतिमिति । प्रपन्ना अपीति शेषः । अनेन य इति यच्छब्दस्य नृगतिप्रपन्ना अपीत्यनेनान्वय उक्तो भवति । उत्पत्तुमर्हतीत्यस्य शेषेण यत्रेत्यादेः यत्र सहधर्मतत्त्वज्ञानं भगवत आराधनं चोत्पत्तुमर्हति । तामित्यर्थो वक्तव्य इति भावेनाह ॥ ज्ञानादि योग्यामिति । आदि शब्देन निवृत्तधर्माराधनयोर्ग्रहणं । निषेधकार्थस्य नो इत्यस्य प्रपन्ना इत्यस्यावृत्तिं कृत्वा तेनान्वयो वक्तव्य इत्यभिप्रेत्याह ॥ न प्रपन्ना इति । अनेन येऽभ्यर्थितां यत्र सहधर्मतत्त्वविषयं ज्ञानं भगवत आराधनं चोत्पत्तुमर्हति । तां नृगतिं प्रपन्ना अपि विततया भगवतो मायया मोहिताः सहधर्मतत्त्वविषयं ज्ञानं वितरंति । अमुष्य भगवत आराधनं च न वितरंति ते नृगतिं नो प्रपन्ना इति श्लोकस्य पदान्वयः सूचितो भवति । ये नृगतिं प्रपन्ना अपि भगवतो विततया मायया मोहिताः सहधर्मतत्त्वविषयं ज्ञानं न वितरंति भगवत आराधनं च न वितरंतीत्यस्य तात्पर्यार्थमाह ॥ ते मोहादिति । ते धर्मज्ञानभगवदाराधनयोग्यनृगतिं प्रपन्ना मोहात् भगवन्मायया मोहात् । भगवदाराधनं कुर्वंतीत्युपलक्षणं । सहधर्मतत्त्वज्ञानं च संपादयंतीत्यपि द्रष्टव्यं । ये नृगतिं नो प्रपन्ना इत्यस्य तात्पर्यार्थमाह ॥ धर्मेति । धर्म । ज्ञानेति भगवदाराधनस्याप्युपलक्षणं । धर्मज्ञानभगवदाराधनविवर्जिता मानुषा एव न भवंति किंतु पशव इति तात्पर्यार्थं इति । एतेन ये मोहाद्भगवदाराधनं न कुर्वंतीति वक्तव्यं । ते मोहाद्भगवदाराधनं न कुर्वंतीति कथनमनुपपन्नमिति दूषणं निरस्तं । ये नृगतिमित्यस्यान्वयपूर्त्यर्थं मोहादिति । तच्छब्दः प्रयुक्त इत्यनंगीकारात् ॥२४॥ वक्रभ्रुवेत्यस्य वक्रे कुटिल वक्रे स्थितया भ्रुवेत्यर्थः । एतेन वक्रे स्थितयेति विशेषणं व्यर्थमिति दूषणं परास्तं । वक्र शब्देन कुटिलवक्त्रं गृहीत्वा कुटिलवक्त्रस्थितत्वोक्त्या भ्रूकौटिल्ये वक्त्रकौटिल्यं निमित्तमित्युक्तं भवतीत्यभ्युपगमात् ॥ २८ ॥ आरपुरटवज्रकवाटिका इत्यस्य निर्णिक्तपित्तलसदृशसुवर्णवज्रमयकवाटिका इत्यर्थः । एतेन वैकुंठे सुवर्णदौर्लभ्याभावात्कवाटिकासुवर्णस्य पित्तलयुक्तत्वाभिधानमयुक्तमिति दूषणं पराकृतं । कवाटिका सुवर्णस्य महाकांतिज्ञापनार्थमार शब्देन निर्णिक्तपित्तलसादृश्यमुच्यत इत्यभ्युपगमात् ॥ २९ ॥ समस्तकुक्षौ स्थिते भगवति इह वैकुंठे स्थिताद्भगवतोंऽतरं भेदो नेत्येतद्धि प्रमाणप्रसिद्धं । किं तत्प्रमाणमित्यतो वैकुंठस्थितज्ञानिनां प्रत्यक्षं प्रमाणमिति भावेनाह ॥ आत्मानमिति । यत्र यस्मिन्वैकुंठे स्थिता धीरा आत्मानं सर्व-

कुक्षिस्थं परमात्मानं आत्मनि वैकुंठस्थितपरमात्मांतर्गतत्वेन पश्यंति सर्वकुक्षिस्थितं । भगवंतं वैकुंठस्थितभगवदैक्येन पश्यंतीति यावत् । अत्र दृष्टांतमाह ॥ नभो घटपटाद्याकाशं नभसीव महाकाश इव महाकाशांतर्गतत्वेन यथा पश्यंति । तत्र वैकुंठे स्थिताभ्यां सुरलिंगिनोः । सुरलिंगेभ्यां युवयोः युवाभ्यां अस्य वैकुंठस्थितपरमेश्वरस्योदरभेदिभयं सर्वोदरस्थितभगवद्भेदानिमित्तकभयं व्युत्पादितं ज्ञातं । यतो यत्परमेश्वरस्य भयव्युत्पादनं तत् किं कुत्सितं । भयसाधनमित्येतद्धि प्रमाणप्रसिद्धमिति ॥ ता०अर्थः ॥ समस्तकुक्षावित्यतः परमध्याहार्यं दर्शयति ॥ स्थित इति । यत्रेत्यस्य तात्पर्यमाह ॥ अस्मिंल्लोक इति । अस्मिन्वैकुंठलोके स्थिता धीराः तत्स्थं सर्वोदरस्थितं भगवद्रूपं बहिष्ठैक्येन सर्वोदराद्बहिर्वैकुंठे स्थितान् भगवत ऐक्येन पश्यंति । भगवदैक्ये नभो नभसीवेति दृष्टांत उक्त इत्यभिप्रेत्य नभो नभसी-वेत्यनुवादः कृतः । यत्रेति यच्छब्दस्य तच्छब्दसापेक्षत्वात्तत्रेत्यध्याहारः कृतः तत्र वैकुंठे । स्थिताभ्यामिति शेषः । संकोचे कारणाभा-वात् । उदर शब्देन सर्वोदरं ग्राह्यमिति भावेन प्रत्युदरेत्युक्तं । प्रत्युदरभेदनिमित्तं प्रत्युदरांतर्यामिभेदनिमित्तं मूले यत इति । तसिः प्रथमादेश इत्यंगीकृत्य तदित्यध्याहारं चाभ्युपेत्य यत्परमेश्वरभयव्युत्पादनं तत् किं कुत्सितमिति किं शब्दस्यान्वयो वक्तव्य इति भावेन व्युत्पादितं किमित्युक्तं । एतेन व्युत्पादितं भयमिति सिद्धत्वाद्व्युत्पादितं किमिति कथमप्रयुक्तमिति चोद्यस्यानवकाशः । ननु परमेश्वरे भयं ज्ञातमिति वक्तव्यं । न तु व्युत्पादितमित्याशंकापरिहारार्थं तात्पर्यार्थमाह ॥ सर्वांतर्यामित्वेनेति । अन्यथेत्यादि शेषपूरणेन किमिति पदं । परमेश्वरे भयमस्तीति भावः कृत इत्यनंगीकारे बाधकप्रदर्शनपरतयाऽपि व्याचष्टे ॥ अन्यथेति । तेनान्यथा किमिति निवारणमित्यस्य व्याख्यानं नास्तीति शंकानवकाशः । सर्वांतर्यामिभयं वैकुंठस्थितभगवतोऽस्तीति जानतां भयं भवतीत्यत्र प्रमाणमाह ॥ सर्वेति । यद्वै-कुंठस्थितं ब्रह्म तदेव सर्वोदरगतं । अतो वैकुंठस्थितं ब्रह्म सर्वोदरगतं ब्रह्मभयेन युक्तमिति ये विचक्षते तेषां सर्वत्रापि भयं भवेत् । मृतानां तमश्च भवत्येवेति ॥ ३२ ॥ अत्र रमाद्यंगमयोपसृष्टं संसृष्टमित्येवं प्रकारेणेंदिराया उत्स्मृतमित्याश्चर्यविषयीभूतां स्वानां भक्तानां धिया विरचितं विशेषेण स्मृतं बहुसौभगाढ्यं बहु सौभगविशिष्टं चेति । अत्र विरचितमित्यनेन स्मृतत्वमेवोच्यत न तु कृतत्वमित्यभिप्रेत्या-चार्यैस्तात्पर्ये उक्तं ॥ तस्यार्थः ॥ अविद्यमानकरणं अविद्यमानस्योत्पादनं तथा पूर्वसिद्धेषु पूर्वज्ञानेष्वर्थेषु विद्यमानस्मृतिज्ञानकाले विद्य-मानस्य स्मरणमित्युभयं रचनं प्रोक्तं । पूर्वज्ञातेषु ज्ञानकालेऽविद्यमानस्य तु स्मरणं स्मृतिरिति । एतेन पुर्वसिद्धेषु तु स्मृतिरित्येतद्व्यर्थमिति चोद्यं निरस्तं ॥ ४२ ॥ हे अंग ये त्वदंघ्रिशरणास्त्वत्पाद एव शरणाः कुशला दाराधनकुशलाः कीर्तन्यतीर्थयशसः कीर्तनीयशुद्धयशसो भवतः कथाया रसज्ञास्ते आत्यंतिकं मुख्यं प्रसादं प्रसादसाध्यं मोक्षं विशेषेण प्राधान्येन । अपि शब्दोऽवधारणे । नापिनैव गणयंति । ते

भ्रुव उन्नयैः विजृंभणैरर्पितभयमन्यत्। पारमेष्ठ्यादिकं न गणयंतीति किंच किमु वक्तव्यं। भगवदर्थं मोक्षगणनस्य क्रियमाणत्वान्न गणयंतीत्युक्ते बाधः स्यादतो विशेषेण न गणयंतीत्युक्तं। गौणमोक्षव्यावृत्त्यर्थं आत्यंतिकमित्युक्तमिति। अत्र केचन मुक्तियोग्या मोक्षं न गणयंतीत्युक्त्या केचन मुक्तियोग्या मोक्षं गणयंतीति प्रतीयते। तदनुपपन्नं। मोक्षकामनाराहित्यलक्षणभाक्तिज्ञानपरिपाकस्य मोक्षसाधनत्वात्। मोक्षकामनाविशिष्टानां मोक्षाभावप्रसंगादिति चेन्न। मोक्षकामनाराहित्यलक्षणभाक्तिपरिपाकाभावेऽपि केषांचिन्मुक्तिर्भवतीत्यंगीकारात्। नन्वेवं तर्हि मोक्षकामना-विशिष्टानामपि मोक्षस्य जायमानत्वान्मोक्षकामनात्यागो व्यर्थ इति चेन्न। मोक्षेच्छुभक्तिसुखापेक्षया मोक्षानिच्छूनां मुक्तिसुखमाधिक-मित्यंगीकारात्॥ ता० अर्थः॥ कश्चिद्भक्तिज्ञानपरिपाकान्मोक्षकामनाराहित्यलक्षणभक्तिज्ञानपरिपाकात्पूर्वं च पूर्वमेव। भाक्तिज्ञानपरि-पाकं विनैवेति यावत्। किंचिन्मुच्यते। भक्तिज्ञानपरिपाकाभावे साधनाभावे कथं मोक्ष इत्यत आह॥ दर्शनेनेति। तत्र तस्य हरेर्द-र्शनेन मुच्यते। भक्तिज्ञानपरिपाकं विना भगवद्दर्शनमात्रेण मुक्तिश्चेदुत्तमाधिकारिणां भक्तिज्ञानपरिपाको व्यर्थः स्यादित्याशंकापरिहारार्थं किंचिन्मुच्यत इत्युक्तं। तदेव विवृणोति॥ नेति। भक्तिज्ञानपरिपाकरहितानामानंदः पूर्णतां व्रजेत् भक्तिज्ञानपरिपाकविशिष्टानामा-नंदो न्यूनतां व्रजेत्। मोक्षेच्छुभ्य इत्यतः परमुत्तमाधिकारिणां मोक्षगणनात्यागः सार्थक इति शेषः। यतो मोक्षेच्छुभ्योऽनपेक्षकाणां मोक्षानपेक्षकाणामानंदोद्रेकः प्रमाणसिद्धोऽत उत्तमाधिकारिणां मोक्षगणनात्यागः सार्थकः। तेषां मोक्षेच्छूनां परिपाकतो मोक्षकामना-राहित्यलक्षणभक्तिज्ञानपरिपाकतः पूर्वं ब्रह्मदृष्ट्या मुक्तिप्राप्तेः प्रमाणसिद्धत्वाद्भक्तिज्ञानपरिपाकाभावे कथं मुक्तिः स्यादित्याशंकानवकाश इति शेषः। मोक्षकामनारहितानां प्रकारांतरेणाधिक्यं प्रमाणेनाह॥ मुमुक्षोरिति। न केवलो मोक्षकामनारहितो भक्तो मुक्तेः पूर्वं मुक्तावपि मुमुक्षोः सुखी अधिकसुखी भवेदिति॥ ४८॥ इति श्रीभागवतटिप्पण्यां षोडशोऽध्यायः॥ ३--१६॥ ॥ ॥

॥ हरिः ॐ॥ ॥ सोऽसाधुवादस्तत्कीर्तिं तस्यासाधुविषयस्य कीर्तिं हंति। अत्र दृष्टांतमाह॥ त्वचमिवेति। त्वचं त्वच आमयो रोग इव यथा कुष्टरोगः कीर्तिं हंति। एतेन कीर्तिं हंतीत्यत्रैव दृष्टांतो वक्तव्यः। आमयो रोगस्त्वचं हंतीति हननमात्रे दृष्टांत-कथनमसंगतमिति दूषणं परास्तं। त्वचमिति द्वितीया षष्ठ्यादेश इत्यभ्युपगम्य कुष्टरोगो यथा कीर्तिं हंतीत्यर्थस्योक्तत्वात्॥ ५॥ मधुव्रतपतेः मधुना सारस्य व्रतं भोजनं येषां ते मधुव्रताः। तेषां पतेरिति यावत्। नवदामधाम्नः नूतनमौक्तिकादि धारकस्य तत उरसि स्थिताऽपि लक्ष्मी धन्यार्पितांघ्रितुलसीपादस्था तुलसी तस्याः लोकं पादस्य स्थानं स्पर्धमेव कामयानेति। एतेन तुलस्या इति वक्तव्यं तुलसीति प्रथमांतप्रयोगोऽनुपपन्न इति दूषणस्यानवकाशः। तुलसीति प्रथमा षष्ठ्यादेश इत्यंगीकारात्॥ ता० अर्थः॥ भ्रमराणां

पतेरिति प्रतीतिं वारयितुं मधुपतेरित्यस्य विवक्षितमर्थमाह ॥ सारग्राहिणां पतेरिति । ननु पतिः समास एवेति समास एव घिसंज्ञाया विधानात्सारग्राहिणां पत्युरिति वक्तव्यं । पतेरित्यनुपपन्नमिति चेन्न । पतिः समास एवेत्यस्य पति शब्दः प्रायः समास एव घिसंज्ञकः क्वचिदसमासेऽपि घिसंज्ञको भवतीत्यर्थ इत्यंगीकारात् । अन्यथा इको यणिचित्यादाविव समास इत्यनेनैवासमासव्यावृत्तेः संभवादेवकारो व्यर्थः स्यात् । अंघ्रितुलसीति प्रथमायाः षष्ठ्यादेशत्वमंगीकृत्य लोकमित्यनेनान्वयः कर्तव्य इति भावेनोक्तं ॥ अंघ्रिस्थतुलसी लोकमिति । लोक शब्देन पादाख्यस्थानमेव ग्राह्यमिति भावेन स्थानमित्युक्तं । नवदामधाम्न इत्यतः परमध्याहार्यं दर्शयति ॥ उरसिस्थाऽपीति । महालक्ष्म्या भगवत्कामनाया विद्यमानत्वात् । कामयानेत्यनुपपन्नमित्याशंकायामिव शब्दस्य कामयानेन नान्वयः किंतु अध्याहृतेन स्पर्धयेत्यनेनान्वयः । अतो न दोष इत्यभिप्रेत्योक्तं ॥ स्पर्ध एव कामयानेति । नवदामधाम्न इत्यतः परमुरसिस्थाऽपीत्यस्य शेषः कर्तव्य इत्यत्र ज्ञापकमाह ॥ लब्ध्वेति ॥ २० ॥ क्रुद्धयेत्यतः परं पुरेति प्रक्षिप्तं । यदेत्वाच्छिन्नं । अन्यथैतत्पुरेत्यनेन पुनरुक्तिप्रसंगः । अत एव क्वचित्पुस्तके क्रुद्धदयायेति पाठो दृश्यत इति ॥ ३० ॥ इति श्रीभागवतटिप्पण्यां सप्तदशोऽध्यायः ॥ ३–१७ ॥ ॥ ॥

॥ हरिः ॐ ॥ ॥ यद्यस्मादहं त्वदीयेभ्योऽदुद्रुहः । अदुद्रुह इत्येतत्किल प्रसिद्धं । तस्माद्रथानां । अर्श आदिभ्योऽच् । रथिनां यूथपाधिपस्त्वं अस्वस्तये नाशाख्यामंगलाय नः अस्मान्सुघटस्व । तेनास्मान्संस्थाप्य स्वकानामश्रु प्रमृज च । यः स्वां प्रतिज्ञां नातिपिपर्ति अतिशयेन न पालयति सोऽसन्निति । एतेन यस्मात्कारणादहं भवदीयं द्रोहमकार्षं तस्मादसद्घटेनास्मान् संस्थाप्य स्वकाना-मश्रु प्रमृजेति वक्तव्यं । त्वमदुद्रुह इति कथनमसंगतमिति दूषणमपास्तं । तिङां च तिङिति वचनाददुद्रुह इति मध्यमपुरुष उत्तमपुरुषा-देश इत्यंगीकारात् ॥ १२ ॥ इति श्रीभागवतटिप्पण्यामेकोनविंशोऽध्यायः ॥ ३–१९ ॥

॥ हरिः ॐ ॥ ॥ वचः ऋतं सत्यमित्यसुरमोहनार्थ इत्युक्तं । एतेन न यावदेष वर्धेत्यादि ब्रह्मवाक्यस्य सत्यत्वाभावाद्वचः ऋतमित्ययुक्तमिति दूषणं पराकृतं ॥ १ ॥ ननु हिरण्याक्षिसंबंधिनिरायुधहरिबाधनाभावस्य हरिप्रियत्वाभावेन धर्मत्वाभावाद्धर्मं मानय-न्नित्ययुक्तमित्याशंक्य हरिप्रियस्यैव वेदप्रणिहितो धर्म इत्यादि वचनात् । वेदविहितस्यापि धर्मत्वेन निरायुधबाधनाभावस्य विशिष्यवेद-विहितत्वाद्धर्मत्वमुक्तमिति परिहारो द्रष्टव्यः ॥ ता० अर्थः ॥ यत्सत्यं सता निर्दुष्टेन वेदेन ज्ञाप्यं । विशिष्यवेदाविहितमिति यावत् । तद्धर्म इति प्रोक्तः । प्रोक्तं । यद्धरेः प्रियं तद्धर्म इति प्रोक्तं । चापि शब्दौ परस्परसमुच्चयौ । एतेन सत्यस्य धर्मत्वांगीकारे पदार्थानां ॥ १७ ॥

सत्यत्वाद्धर्मत्वं स्यादिति चोद्यं परिहृतं । सच्छब्दाप्यर्थे यत्प्रत्यये सत्यमिति रूपं निष्पन्नमित्यभ्युपगम्य सत्यमित्यस्य वेदज्ञाप्यमित्यर्थ इत्यभ्युपगमात् ॥ ४ ॥ इति श्रीभागवतटिप्पण्यां विंशोऽध्यायः ॥ ३-२० ॥ ॥ ॥

॥ हरिः ॐ ॥ ॥ विविक्ताध्यात्मदर्शनः विविक्तं ज्ञातुमशक्यं अध्यात्मं आत्मानं देहमधिकृत्य विद्यमानं त्याज्यत्वादि धर्मजातं पश्यतीति विविक्ताध्यात्मदर्शनः । स भगवान् अस्य चतुर्मुखस्य कार्पण्यमवधार्य घोरामात्मतनुं विमुंचेत्युवाच इति भगवतोक्तश्चतुर्मुखो जघनसंज्ञकां तनुं विमुमोचेत्येतद्धि प्रसिद्धमिति । एतेन विविक्ताध्यात्मदर्शन इत्यनेनोच्यत इत्यभ्युपगमात् ॥ २८ ॥ रूपद्रविणपण्येनेत्यस्य रूपलक्षणद्राविणसाध्यपण्येनेत्यर्थः । एतेन रूपपण्येनेत्यनेनैव पूर्णत्वाद्रविणेत्येतद्व्यर्थमिति दूषणं परास्तं । रूपलक्षणस्याति दुर्लभत्वं वक्तुं द्रविणेत्यनेन बहुद्रविणसाध्यत्वमुच्यत इत्यंगीकारात् ॥ ३४ ॥ तया जृंभणाख्यतन्वा उन्मादः । उत्पन्न इति शेषः । येन पिशाचादय उच्छिष्टान् उच्छिष्टयुक्तान् पुरुषान् घर्षयंति तमुन्मादं प्रचक्षत इति । एतेन तयेत्यादिकमनन्वितमिति दूषणं परास्तं । उन्माद इत्यादिना शेषमंगीकृत्यान्वयस्योक्तत्वात् ॥ ४१ ॥ इति श्रीभागवतटिप्पण्यामेकविंशोऽध्यायः ॥ ३--२१ ॥ ॥ ॥

॥ हरिः ॐ ॥ अखिलसत्त्वराशेः पूर्णज्ञानबलसमुद्रस्य तव दर्शनान्नोऽक्ष्णोर्जुष्टं फलमथ संसिद्धं सम्यक् सिद्धमित्येतद्भुत आश्चर्यमिति । एतेनाक्ष्णोः सम्यक् संसिद्धमिति वक्तव्यमक्ष्णोर्जुष्टं संसिद्धमिति कथनमनुपपन्नमिति शंका निरस्ता । जुषी प्रीतिसेवनयोरित्युक्तत्वात् । प्रीत्यर्थकात् जुषी धातोः कर्मणि क प्रत्यये जुष्टमिति रूपं निष्पन्नमित्यभ्युपगमम्य जुष्टमित्यनेन प्रीतिविषयत्वेन फलस्य गृहीतत्वात् ॥ १३ ॥ हे अधीश यद्भूतसूक्ष्मं ब्रह्मांडाख्यं पदं प्रतिमारूपं मायया इच्छामात्रेण जग्रहे तदेतत्पदं प्रतिमारूपं तव ईप्सितं न भवतीत्येतत् बत आश्चर्यं । तर्हि किमर्थं ब्रह्मांडाख्य प्रतिमारूपं गृहीतमित्यत आह ॥ तर्हीति । यस्माद्भगवान् त्वं ब्रह्मांडे ज्ञानिभिर्लक्षितो दृष्टोऽतो ब्रह्मांडं भगवतस्तव प्रतिमारूपं । ब्रह्मांडे ज्ञानिभिर्दृष्टस्य भगवकत्त्वं कुत इत्यतो भगवल्लक्षणयुक्तत्वाद्भगवत्त्वं युक्तमेवेति भावेनाह ॥ मालयेति । यस्माद्ब्रह्मांडे ज्ञानिदृष्टः पुरुषो लसत्तुलस्या माल्या विलक्षितोऽतो भगवानिति ॥ २० ॥ इति श्रीभागवतटिप्पण्यां द्वाविंशोऽध्यायः ॥ ३-२२ ॥

॥ हरिः ॐ ॥ ये शारीराः शरीरजन्या ये च दिव्या अंतरिक्षजन्या ये च मानुषा मनुष्यजन्या ये च भौतिका भूतप्रेतादिभ्यो जन्याः क्लेशाः क्लेशसाधनानि पर्याप्ते च । च शब्दोऽप्यर्थे । व्यत्यस्तेऽपि देवादि जन्मापेक्षया व्यत्यस्तं यन्मानुषजन्म तस्मिन् प्राप्तेऽपीति यावत् । हरिसंश्रयं कथं बाधं क्लेशमुत्पादयंति । न कथमपि । अयं तु हरि संश्रयोत्तमोऽस्य स्वायंभुवमनोः शारीरादि पीडा कथं

स्यादिति । पर्यासे चेत्यस्यायमेवार्थो वक्तव्य इति भावेन तात्पर्यार्थः ॥ ३७ ॥ इति श्रीभागवतटिप्पण्यां त्रयोविंशोऽध्यायः ३---२३ ॥

॥ हरिः ॐ ॥ अन्ये पुनर्भगवतो भ्रुव उद्विजृंभविभ्रंसितार्थरचना उद्विजृंभणेन विनाशिता विषयभोगचमत्कारा येषां ते किं कुत्सिताः । अनेन काम्यकर्माणि कृत्वा ये विषयभोगान्कुर्वंति तेषां भोगा भगवाद्विजृंभणेन पुनः पुनर्नष्टा भवंति । अतस्ते भोगा हेयाः । भगवदपरोक्षज्ञानसामर्थ्यलब्धभोग एवोपादेया इत्युक्तं भवति । त्वं तु सिद्धासि अपरोक्षज्ञानसामर्थ्यलब्धभोगेष्वपि कृताऽसि । अतो नरैर्नृपविक्रियाभिर्नृपाणामपि विक्रियाभिर्विजयादिरूपाविविधक्रियाभिः दुरधिगान्प्राप्तुमशक्यान् निजधर्मदेहान् दिव्यान्विभवान् भुंक्ष्वेति ॥ ७ ॥ अथादर्शे स्वमात्मानमित्यस्य अथ अनंतरं । आदर्श इत्यस्यावृत्तिः । आदर्शे दर्पणे स्वात्मानमदर्शयदित्यर्थः । अत एव तात्पर्यं । एतेनादर्श इत्यतः परं ददर्शेति किं शेषः प्रदर्शितः । किंवाऽऽदर्श इत्यनूद्य ददर्शेत्यर्थ उक्तः । नाद्यः । आदर्श इत्यस्य दर्पणार्थत्वमनंगीकृत्य ददर्शेत्यर्थकत्वांगीकारे आत्मदर्शनस्य सिद्धत्वेनात्मानं ददर्शेत्यस्य प्रसंगादिति चोद्यं निरस्तं । आदर्श इत्यस्यावृत्तिमंगीकृत्यैकस्यादर्शे इत्यस्य दर्पण इत्यर्थो वक्तव्य इति भावेन द्वितीयस्यादर्श इत्यस्यानुवादं कृत्वाऽऽदर्शेत्यर्थ उक्त इत्यूरीकरणात् ॥३०॥ इति श्रीभागवतटिप्पण्यां चतुर्विंशोऽध्यायः ॥ ३--२४ ॥ ॥ ॥

॥ हरिः ॐ ॥ सत्यलौकिके यथार्थ ज्ञानयोग्ये विषये मया प्रोक्तं लोकस्य प्रमाणमित्येताद्धि प्रमाणप्रसिद्धमिति । एतेन सत्यलौकिक इत्येतद्व्यर्थमिति दूषणं परास्तं । सत्य शब्दो यथार्थवाची लोक शब्दो ज्ञानवाची । सत्यलोक शब्दाद्योगार्थे ढक् प्रत्यये उत्तरपदवृद्धौ सत्यलौकिक इति रूपं निष्पन्नं । विषयसप्तमी चेयं । ततश्च सत्यलौकिक इत्यस्य यथार्थ ज्ञानयोग्ये विषय इत्यर्थो लभ्यत इति स्वीकृत्य यथार्थ ज्ञानयोग्यं प्रत्येव मया प्रोक्तं लोकस्य प्रमाणं न तु यथार्थ ज्ञानस्यायोग्यं प्रतीति वक्तुं सत्यलौकिक इति पदं सार्थकमित्यभ्युपगमात् । अतस्तात्पर्यं । अत्र यथार्थज्ञानविषय इत्यस्य यथार्थज्ञानयोग्ये विषय इत्यर्थः । एतेन सत्यलौकिक इत्यस्य यथार्थज्ञानयोग्ये विषय इत्यर्थो वक्तव्यः । यथार्थज्ञानविषय इति व्याख्यानमनुपपन्नमिति चोद्यं परिहृतं । यथार्थज्ञानविषय इत्यत्र विषयशब्दस्य योग्यार्थत्वं सप्तम्याश्च विषयार्थत्वमिति भावेन सत्यलौकिक इत्यस्य यथार्थज्ञानविषय इत्यर्थ उक्त इति स्वीकरणात् । ॥ ३५ ॥ नाख्यात्युपप्लव इत्यस्य उपप्लवः दुःखाद्युपप्लवःनाख्याति न भासत इत्यर्थः । दुःखाद्युपप्लवप्रसक्तिरेव न भवतीति भावः । एतेन दुःखाद्युपप्लवो नेत्यनन्नैव पूर्णत्वादाख्यातीत्येतद्व्यर्थमिति दूषणस्यानवकाशः । अत एव विद्यमानस्यापि दुःखाद्युपप्लवस्य प्रतीतिर्न भवतीत्युच्यत इति भ्रमं वारयितुं तात्पर्यं ॥ ४० ॥ इति श्रीभागवतटिप्पण्यां पंचविंशोऽध्यायः ॥ ३--२५ ॥ ॥

॥ हरिः ॐ ॥ चक्षुः सूर्य इवोदित इत्यस्य चक्षुरिव सूर्य इवोदित इत्यर्थः । एतेन सूर्य इवोदित इत्यनेनैव पूर्णत्वाच्चक्षुरिवेत्येतद्व्यर्थमिति दूषणस्यानवकाशः । न केवलं सूर्यस्य कार्यं करोति चक्षुषोऽपि कार्यं करोतीति ज्ञापनार्थं चक्षुरिवेति वक्तुं चक्षुरिति पदं प्रयुक्तमिति स्वीकरणात् ॥ ९ ॥ भक्तिः सिद्धेर्गरीयसीत्यस्य सिद्धेरल्पाधिकारिणां मुक्तेर्भक्तिर्गरीयसीत्यर्थः । एतेनोत्तमाधिकारिणां मुक्तेर्भक्तिर्गरीयसी चेत् उत्तमाधिकारिणां मुक्तिर्व्यर्थास्यादिति चोद्यं परिहृतं । अल्पाधिकारिमुक्तिसुखापेक्षयोत्तमाधिकारिणां संसारे जायमानं भक्तिसुखमाधिकमिति भक्तिः सिद्धेर्गरीयसीत्यनेनोच्यत इत्यूरीकरणात् ॥ता० अर्थः॥ अल्पाधिकारिणामपूर्णभक्तेः उत्तमाधिकारिभक्त्यपेक्षयाऽपूर्णाया भक्तेर्मुक्तौ तु मुक्तावपि सुखपूर्ति नेष्यति न प्राप्नोति । उत्तमाधिकारिमुक्तिसुखापेक्षयाऽल्पाधिकारिमुक्तिसुखमल्पमेवेति यावत् । अत उत्तमाधिकारिमुक्तिसुखापेक्षयाऽल्पाधिकारिमुक्तिसुखस्याल्पत्वात् तादृशमुक्तेश्चापूर्णभक्तिजन्याऽल्पाधिकारिमुक्तेरप्युत्तमाधिकारिणां पूर्णा । अल्पाधिकारिणां भक्त्यपेक्षया पूर्णा । अधिकेति यावत् । भक्तिर्गरीयसी संसार एवाधिकसुखप्रदेति ॥ ३३ ॥
इति श्रीभागवतटिप्पण्यां षड्विंशोऽध्यायः ॥ ३--२६ ॥ ॥ ॥

॥ हरिः ॐ ॥ कार्यकारणकर्तृत्वे कार्याणि शरीराणि कारणानींद्रियाणि तेषां कर्तृत्वे ब्रह्मादिनिष्ठे प्रकृतिं चित्प्रकृतिं कारणं विदुः । अनेन जीवा लक्ष्मीमोहेन विष्णोर्ज्ञानशून्याः संतो बंधककर्माणि कृत्वा स्वस्वशरीरेंद्रियाणि कुर्वंतीत्युक्तं भवति । सुखदुःखानां भोक्तृत्वे जीवनिष्ठसुखदुःखभोगशक्तौ प्रकृतेः परं पुरुषं नारायणं कारणं विदुः । अनेन विष्णुरेव सुखदुःखभोगशक्तिं जीवेभ्यो ददातीत्युक्तं भवति । यद्यपि लक्ष्मीरपि सुखदुःखभोगशक्तिं जीवेभ्यो ददाति । तथाऽपि सुखदुःखभोगशक्तिदानप्रवृत्तेः प्रवृत्त्यंतरापेक्षयाऽल्पत्वादविवक्षया विष्णुरेव सुखदुःखभोगशक्तिप्रद इत्युक्तमिति ॥ ता० अर्थः ॥ श्रीविष्णुबलसंश्रयाद्ब्रह्मादिभिः रुद्रादि सर्गकर्ती लक्ष्मीप्रेरिता ब्रह्मादयो रुद्रादि सर्गं कुर्वंतीति यावत् ॥ अथवा ॥ श्रीविष्णुबलसंश्रयात् ब्रह्मादिभिः सर्वजीवैः कर्मद्वारा स्वस्वशरीरेंद्रियसर्गकरी । जीवा लक्ष्मीप्रेरणया कर्माणि कृत्वा स्वस्वशरीरेंद्रियाणि कुर्वंतीति यावत् । विष्णुः सुखदुःखभोगशक्तिप्रद इति विशिष्य वक्ष्यमाणे विष्णुः सुखदुःखादिप्रदो नेति शंका स्यात् । तां शंकामुपोद्घातसंगत्या परिहरति ॥ सुखदुःखप्रद इति । यद्यपि सनातनो विष्णुः स्वयमेव स्वातंत्र्येणैव सुखदुःखप्रदः। सुखदुःख शब्दः सुखदुःखभोगशक्तिव्यतिरिक्तसर्वोपलक्षकः। सुखदुःखादि सर्वप्रदस्तथाऽपि अन्येषां च ब्रह्मादीनामपि तदाज्ञया विष्ण्वाज्ञया सुखदुःखानां सुखदुःखादीनां कर्तृत्वमस्ति । सुखदुःखभोगशक्तिदातृत्वं विष्णोरेव न तु ब्रह्मादीनां । अतो विष्णुः सुखदुःखभोगशक्तिप्रद इति विशिष्टवचनमुपपन्नं । यदर्थमुपोद्घातः कृतस्तदिदानीमाह ॥ भोक्तृत्वमिति।

हरिरेक एव स्वयं स्वातंत्र्येण सुखदुःखानां भोक्तृत्वं भोगशक्तिं करोति। उक्तमर्थं पिंडीकृत्योपसंहरति ॥ **भोक्तृत्वमात्रहेतुत्वमिति**। भोक्तृत्वमात्रहेतुत्वं सुखदुःखभोगशक्तिमात्रहेतुत्वं। अन्यत्र विष्णोरन्यत्र जीवे ब्रह्मादौ कुत्रचित् कुत्रापि नास्ति। सुखदुःखभोगशक्ति-व्यतिरिक्तसुखदुःखादिहेतुत्वं तु विष्णवाज्ञया ब्रह्मादि जीवानामप्यास्ति। सुखदुःखभोगशक्तिदातृत्वं तु विष्णोरेव। सुखदुःखभोगशक्ति-दातृत्वं विष्णोरन्यत्रे क्वापि नास्तीति वक्तव्ये विष्णोरन्यत्र जीवे नास्तीत्युक्त्या महालक्ष्म्याः सुखदुःखभोगशक्तिदानेऽल्पप्रवृत्तिस्स्तीति सूचितं। कार्यकारणकर्तृत्व इति श्लोकस्य प्रकृतिपुरुषशब्दयोर्लक्ष्मीनारायणपरत्वांगीकारे कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते। पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यत इति गीतावाक्यस्य प्रकृतिपुरुष शब्दयोरपि लक्ष्मीनारायणपरत्वं वक्तव्यं। समानार्थकत्वाद्गीताश्लोकस्य। तदनुपपन्नं। प्रकृतिं पुरुषं चैवेति पूर्वश्लोके जडप्रकृतिजीवयोरेव प्रकृतत्वादित्याशंकां परिहरति ॥ **प्रकृतिमिति**। अनेन प्रकृतिं पुरुषं चेति श्लोके प्रकृति शब्देनाचेतनप्रकृतिश्चेतनप्रकृतिश्चेत्युभयेऽपि प्रकृती विवक्षिते। पुरुष शब्देन जीवो विष्णुश्चेत्युभावपि पुरुषौ विवक्षितौ। अन्यथोभावपीत्येतद्व्यर्थं स्यात्। अतःप्रकृतिं पुरुषं चेति श्लोके लक्ष्मीनारायणयोः प्रकृतत्वात् गीताश्लोकस्थप्रकृति-पुरुषशब्दयोर्लक्ष्मीनारायणपरत्वमुपपन्नमित्युक्तं भवति ॥ ९। इति श्रीभागवतटिप्पण्यां सप्तविंशोऽध्यायः ॥ **३--२७** ॥ ॥ ॥

॥ हरिः ॐ ॥ पुरुषः परमात्मा प्रकृतिस्थोऽपि प्रकृतिकार्यशरीरस्थोऽपि प्राकृतैः प्रकृतिकार्यसंबंधिभिर्गुणैः सुखदुःखादिभिर्नाज्यते न संबध्यते। तत्र हेतुमाह ॥ **अविकाराहिति**। अविकारात् षड्भावविकाराभावात्। अकर्तृत्वात् आयासेन कर्तृत्वाभावात्। निर्गुण-त्वात् सत्त्वादिगुणरहितत्वात्। पुरुषो जीवः प्रकृतिस्थः प्रकृतिकार्यशरीरस्थः सन् प्राकृतैः प्रकृतिकार्यसंबंधिभिर्गुणैः सुखदुःखादि गुणैर्नाज्यते संबध्यते। तत्र दृष्टांतमाह॥ **जलार्कवदिति**। यथा जलगतः प्रतिबिंबसूर्यो जलगुणैः कंपादिभिः संबध्यते। तथा स एष जीवो यर्हि यस्मात् प्रकृतेः प्रकृतिकार्यशरीरस्य गुणेषु सुखदुःखादि गुणेषु अभिविषज्जते अतिविशेषेण सक्तिमान्भवति। यस्मादहंकारविमूढात्मा अहंकारेण विमूढो विस्मृतः परमात्मा येन सोहंकारविमूढात्मा सन् अहंकर्ताऽस्मीत्यभिमन्यते अभिमानवान्भवतीति। एतेन जलगतप्रतिबिंबार्कस्य जलगतकंपादिगुणैः संबंधस्य विद्यमानत्वात्। जलार्कवत्परमात्मा प्राकृतैर्गुणैर्नाज्यत इति वक्तव्यमनुपपन्नमिति चोद्यं
निरस्तं। पुरुष इत्यादीनामावृत्तिमंगीकृत्य पुरुषो जीवो जलार्कवत्प्राकृतैर्गुणैरज्यत इत्यर्थस्यैवोक्तत्वात्। एतेनैव पूर्वश्लोके जीवः प्राकृतगुणै- ॥ १९
रज्यत इत्यर्थस्यानुक्तत्वात्। स एष यर्हि प्रकृतेर्गुणेष्वभिविषज्जत इत्यनुवादोऽनुपपन्न इति दूषणं पराकृतं। पुरुष इत्यादि पदानामावृत्तिं स्वीकृत्य प्रकृतिस्थोऽपीति पूर्वश्लोके पुरुषो जीवः प्राकृतैर्गुणैरज्यत इत्यर्थ उच्यत इत्यभ्युपगमात् ॥ १-२ ॥ निवृत्तबुद्ध्यवस्थान

इत्यस्य निवृत्तं बुद्ध्यवस्थानं निद्रादि यस्य निवृत्तबुद्ध्यवस्थान इत्यर्थः । बुद्ध्यवस्थान शब्देन निद्रादिकं ग्राह्यमित्यभिप्रेत्याचार्यैर्बुद्धेरवस्थानं निद्रादीत्युक्तं । बुद्धि शब्दोऽहमिति स्वरूपज्ञानमात्रपरः । अवस्थान शब्दस्य मत्वर्थीयाजंतत्वात् । अवस्थान शब्दोऽवस्थानवद्वाची । निद्रादीत्यादि शब्देन स्वप्नो गृह्यते । ततश्चाहमिति स्वरूपज्ञानमात्रावस्थानविशिष्टत्वाद्बुद्ध्यवस्थान शब्दो निद्रास्वप्नवाचीत्यर्थः । यद्यपि स्वप्नावस्थायां स्वाप्नार्थज्ञानमप्यस्ति । तथाऽपि बाह्येंद्रियजन्यज्ञानाभावाद्बुद्ध्यवस्थान शब्देन स्वप्नावस्थाग्रहणं युज्यते ॥ ११ ॥ अप्रतिबुद्धस्य सर्पव्याघ्रादि विचाररहितस्य प्रस्वापो बह्वनर्थकृत् सर्पव्याघ्रादिनिमित्तकमरणादि बह्वनर्थकृत् इत्येतद्धि प्रसिद्धं । स एव प्रस्वापः प्रतिबुद्धस्य सर्पव्याघ्रादि विचारविशिष्टस्य मोहाय मोहकार्यसर्पव्याघ्रादिनिमित्तकमरणाद्यनर्थाय न वै नैव कल्पते यथेति । एतेन प्रतिबुद्धस्यैव स्वाप इति नियमात् । प्रतिबुद्धस्य स्वापोऽप्रतिबुद्धस्य स्वाप इति स्वापद्वैविध्याभिधानमनुपपन्नमिति दूषणं पराकृतं । प्रतिबुद्धस्येत्यस्य जाग्रदवस्थाविशिष्टस्येत्यर्थमनंगीकृत्य सर्पव्याघ्रादि विचारविशिष्टस्येत्यर्थस्योक्तत्वात् ॥ २६ ॥ इति श्रीभागवतटिप्पण्यामष्टाविंशोऽध्यायः ॥ ३–२८ ॥ ॥

॥ हरिः ॐ ॥ ध्यानेनानीश्वरान् गुणानित्यस्य ध्यानेन भगवद्ध्यानेन अनीश्वरान् ईश्वरेऽविद्यमानान् गुणान् सत्त्वादि गुणान् दहेदित्यर्थः । एतेनानीश्वरानित्येतद्व्यर्थमिति दूषणं परास्तं । गुणानित्येवोक्ते ज्ञानादि गुणानां प्रतीतिः स्यात् । तद्व्यावृत्त्यर्थमनीश्वरानित्यनेन न विद्यंते ईश्वरे एतेऽनीश्वरा इति विग्रहमंगीकृत्य गुणानामीश्वरेऽविद्यमानत्वमुच्यत इत्यनंगीकारात् । यद्यपि जीवस्वरूपभूता ज्ञानादि गुणा ईश्वरे न संति । तथाऽपि तज्जातीयानां ज्ञानादि गुणानां विद्यमानत्वादनीश्वरानित्यनेन तत्प्राप्तिः सत्त्वादि गुणानां सर्वथाऽभावादनीश्वरानित्यनेन तत्प्राप्तिर्युज्यते ॥ ११ ॥ इति श्रीभागवतटिप्पण्यामेकोनत्रिंशोऽध्यायः ॥ ३–२९ ॥ ॥ ॥

॥ हरिः ॐ ॥ द्विषतः परकाये मामित्यस्य परकाय इत्येकवचनं जातौ । परकायेषु परेषां मत्तोन्येषां कायेषु देहेषु । स्वस्यान्येषां च देहेष्विति यावत् । मां द्विषतः कारयिता विष्णुर्नास्तीति वदत इत्यर्थः । अयं भावः । यदि ममान्येषां च देहेषु स्थित्वा विष्णुः सर्वकार्याणां कारयिता स्यात्तर्हीदानीं कार्यविशेषमकुर्वाणं मां कारयितु कुर्वाणं निवारयत्विति वदति ॥ २३ ॥ चापि शब्दौ परस्पर समुच्चयौ । य आत्मनश्चांतर्यामिणश्च परस्परांतर्यामिणः सकाशादपि अंतरोदरं भिन्नं ब्रह्म करोति जानाति । तस्य भिन्नदृशो मृत्युरुल्बणं भयं विधत्त इति ॥ ता० अर्थः ॥ भेद वाचकांतर शब्दान्मत्वर्थीयाच् प्रत्यये कृतेऽतर शब्देन भिन्नमित्यर्थो लभ्यते । उदर शब्दो ब्रह्मवाचीति भावेनांतरोदरमित्यनूद्य भिन्नं ब्रह्मेति व्याख्यातं । आत्मन इति पंचमी । परस्येत्यनंतरं सकाशादिति शेष इत्यंगी-

कृत्यांतर्यामिणः सकाशात्परांतर्यामिणः सकाशादपि भिन्नं मूलब्रह्म यो जानातीत्यर्थो वक्तव्य इति भावेन तल्लब्धमर्थमाह ॥ आत्मस्थमिति । आत्मस्थमात्मांतःस्थित्वा नियामकं अन्यगमन्यांतःस्थित्वा नियामकं ब्रह्म च । मूलब्रह्मण इति शेषः । मूलब्रह्मणः सकाशाद्यो भिन्नं पश्यति । उदरशब्दस्य ब्रह्मवाचकत्वे श्रुतिमाह ॥ उदरमितीति ॥ २६ ॥ इति श्रीभागवतटिप्पण्यां त्रिंशोऽध्यायः ॥३--३०॥

॥ हरिः ॐ ॥ जरस्यास्तीति जरः । जरश्चासौ गौश्च गोजरस्तमित्यर्थः । एतेन वृद्धबलीवर्दमित्यर्थलाभार्थं जरद्गवमिति वक्तव्यं । गोजरमिति कथनमयुक्तमिति चोद्यं निरस्तं । जर शब्दस्य मत्वर्थीयाजंतत्ववृद्धवाचित्वविशेषणस्य परनिपात इति चाभ्युपेत्य गोजरमिति शब्देन वृद्धबलीवर्दमित्यर्थो लभ्यत इत्यभ्युपगमात् ॥ १३ ॥ हे मातः न केवलमेव समीपस्थितपरलोके किंतु अत्रापि आस्मिंल्लोकेऽपि नरको नरकदुःखं स्वर्गः स्वर्गमस्तीति ज्ञानिनः संप्रचक्षते । अनुपलंभबाध इत्यत आह ॥ या इति । या नारक्यो नरकसंबंधिन्यो यातना दुःखविशेषास्ता इति । अस्मिन् लोके राज्यादिभिर्दंड्येषु या लक्षिता दृष्टा ये स्वर्गसंबंधिनः सुखविशेषास्तेऽपि इह लोके राजादिषु दृष्टा इत्येवमिहापीत्यपि शब्दोऽनुक्तसमुच्चय इति । यद्यपि परलोको दूरे वर्तते । तथाऽपि मरणानंतरं शीघ्रं प्राप्यत्वात्समीपास्थितत्वमुक्तं । एतेन परलोके नरकदुःखादेर्विद्यमानत्वात् । अत्रैव नरकः स्वर्गो न तु परलोक इति कथनमनुपपन्नमिति दूषणं परिहृतं । एव शब्दस्य सामीप्यार्थकत्वं न केवलमित्यादीनां शेषं चांगीकृत्य न केवलं.समीपस्थितपरलोके किंत्वस्मिंल्लोकेऽपि नरकः स्वर्गश्चास्तीत्यर्थस्योक्तत्वात् ॥ ता० अर्थः ॥ अत्रैवेत्येव शब्दोऽस्मिंल्लोक एव न तु परलोक इत्यन्ययोगव्यवच्छेदार्थ इति भ्रमं वारयति ॥ अत्रैवेत्येव शब्द इनि । अनेन एव शब्दः समीपस्थितपरलोकपर इत्युक्तं भवति । एव शब्दस्य सामीप्यार्थत्वे प्रमाणमुदाहरति ॥ सामीप्ये चेति । न केवलमत्र किंतु समीपस्थितपरलोकेऽपीत्यर्थ इति भ्रमं वारयाति ॥ अत्राप्यस्तीत्यर्थ इति । न केवलं समीपस्थितपरलोके किंत्वत्राप्यस्मिंल्लोकेऽपि नरकदुःखमस्तीत्यर्थ इत्यर्थः । अनेन परलोके दुःखादिकमस्तीतित्यर्थस्य पूर्वग्रंथेन सिद्धत्वात् । एवेत्यनुवादः । इह लोके दुःखादिकमस्तीत्यर्थस्यासिद्धत्वात् । अत्रेति विधिरित्युक्तं भवतीति ॥ २९ ॥ इति श्रीभागवतटिप्पण्यामेकत्रिंशोऽध्यायः ॥ ३--३१ ॥ ॥ ॥

॥ हरिः ॐ ॥ चैत्यमिव प्रतीतामित्यस्य चितो भावश्चैत्यं चैतन्यं स्वात्मानमिव प्रतीतं पुरस्फूर्तिविषयामित्यर्थः । एतेनैव चैत्य शब्दो न भगवदादि चैतन्यग्रहणेऽप्रसिद्धत्वेन दृष्टांतत्वानुपपत्तिरिति शंकानवकाशः । चैतन्यवाचकेन चैतन्यामित्येनेन तात्पर्यार्थतया स्वात्मनो गृहीतत्त्वात्तस्य चाहमिति प्रसिद्धत्वेन दृष्टांतत्वसंभवात् । एतेनैव प्रतीतामित्यनेनैव भगवद्दर्शनस्योक्तत्वात् । प्रतीतं भगवंतं